CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मा. २४

परहित सार्द्धं स्वात्मोन्नत्यै लक्षं धृत्वा कार्यंकृते
त्रुटिरपि यदि स्यात्तत्र [illegible] सर्वं क्षमते राजारामः

पञ्चाशद्वार्षिकी सुवर्णजयन्ती

स्मारिका-२०४४



श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालय
खिदीम, अर्घाखाँची

श्री वाल्मीकि संस्कृत विद्यापीठलाई
सादर उपहार (संपादक)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मा. २४

प्रकाशक मण्डलम्

हिमवत्खण्डोक्तास्माकं संस्कृति वैदिकी, तस्यानुसारिणी नेपाल राष्ट्रियता, तत्संरक्षितुं संस्कृत भाषा रक्षणस्याऽ वश्यकता मात्रं नहि किन्तु अपरिहार्यता वर्तते इति

— श्री ५ वीरेन्द्र

सम्पादक:-

नारायण गौतम, विद्यालय प्रधानाध्यापक

सहायक:-

माधवराज गौतम कुल सचिव: श्री म. सं. वि. वि.

संशोधक:-

भीमकान्त पन्थी वेदवेदाङ्ग वि. प्र. अ. ,गौरीघाट,

व्यवस्थापक:-

तुलसी गौतम कृ. व. सै. वि. आ. वि शाखा
प्रभा गौतम

प्रकाशक:-

श्री हृ. सं सा. मा. वि. , खिदीम अर्घा खाँची

यस्य छत्रच्छायां हिन्दू सनातन धर्म प्राणो नेपालः स्वाध्यात्मोन्नति पूर्वकं भौतिक बिकाशाय सन्नद्धो वर्तते ।

यस्य सदिच्छायां स्वपितुः संकल्पमयः सँस्कृत विश्व विद्यालयः स्थिरीभूय नेपाल राष्ट्रियताया गौरवात्मकमाधाराशिलास्तँभं दृढिकरोति तस्य वयं आज्ञाकुसुमं शिरसावहामः

प्रकाशन मिति- २०४७ विजयादशमी
मुद्रक:- रोशन प्रिण्टिग प्रेस
प्युखा, न्यूरोड, फोन नं. : २-२२४२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री सुवर्ण जयन्ती समारोहः

संपादकीयाशयः

यदाऽस्माकं क्षेत्रे रजनिसदृशेनान्धतमसा
सुशिक्षाया नेत्रं प्रतिहतमिवान्धं समभवत् ।
तदाब्ध्यङ्काङ्केन्दौ हरिहर उपाध्याय रचित –
मिदं विद्याऽगारं विबुध नययोन्मेषकम भूत् ॥ १ ॥

ततः कालादद्य प्रथितयशसा तेन महता
निपातानुत्पातान् कतिपयकठोरांश्च सरलान् ।
सुमार्गानु त्तीर्य प्रथम वयसि क्षिप्तवपुषा
जयन्ती सौवर्णी स्रगिव धयते मूर्ध्नि विमला ॥ २ ॥

इतः पश्चात्काले पुनरपि च शास्त्रीय विषये
प्रमाणं पत्रान्तं पठन सरणीं प्राप्य सुल भाम् ।
महोत्थानं कर्तुं प्रभवतु समर्थं सुरगिरा –
मितीच्छामः सर्वे नरपति कृते छात्र सदने ॥ ३ ॥

अन्ततः पत्र पत्रिका संपादन कार्ये पूर्वानुभव शून्योऽहंतत्र लेखक महानुभावेभ्यः सहयोगं लब्ध्वाऽ भूत–पूर्वं साहसं साऽवधानत्वं च संकलयन्नपि बहुश स्त्रुट्योंऽ वशिष्टा भवेयुः पाठक महाभागा! स्ता अविगण य्य स्वात्म संशोधन पुरः सरं त्रुटि संकेतेन मामनुगृह्णन्त्विति सधन्यवादं क्षमाप्रार्थी संपादकाऽपसदोऽस्मि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्
यज्ञं दधे सरस्वती ।



या वाणी रामनान्मि प्रसरति-
वहुधा याशिवप्रेयसीच
या कृष्णे भक्तिदात्री सरस-
रसतया मित्रसंमोहनी वा
या वेदे तन्त्रमन्त्रे विवुध-
जनमुखे गीत संकीर्तनेषु
सा वाग्देवी वसेन्मे सुविमल-
वचसि प्रेष्टमन्यरिकमरित ।।

दशैंघरमा नव
निर्मित दुर्गा मन्दिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिः २०४६/१२/२८

शुभ–कामना

श्री हरिहर–संस्कृत तथा साधारण माध्यमिक विद्यालय खिदीम, अर्घाखाँचीले आफ्नो स्वर्ण जयन्ती समारोह मनाएको परिशिष्ट वर्षमा हाल "स्मारिका प्रकाशन गर्न लागेकोमा ज्यादै हर्षित भएको छु ।

यस प्रकारले "स्मारिका" प्रकाशन गर्दा देशको शैक्षिक क्षेत्रमा राष्ट्रिय शिक्षा नीति अनुरूप संस्कृत वाङ्मयको विकास र सम्बर्द्धन गर्नमा महत्वपूर्ण योगदान पुग्न जाने आशा एवं विश्वास लिदै विद्यालयको उत्तरोत्तर प्रगतिको शुभ–कामना व्यक्त गर्दछु ।

(अच्युतराज रेग्मी)
शिक्षा तथा संस्कृति मन्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिः २०४७/२/२९

शुभ–कामना ।

श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयको सुवर्ण जयन्तीको उपलक्ष्यमा स्मारिका प्रकाशन हुन लागेको कुरा थाहा पाउँदा खुशी लागेको छ । वि०सं० १९९४ मा संस्कृत प्रेमी स्व० हरिहर उपाध्यायद्वारा स्थापित यस विद्यालयले नेपालमा संस्कृत शिक्षाको क्षेत्रमा ठूलो योगदान पुऱ्याएको कुरा सर्वविदितै छ । यस विद्यालयबाट विद्या आर्जन गर्नु हुने महानुभावहरू अहिले देशका विभिन्न क्षेत्रका महत्त्वपूर्ण पदहरूमा संलग्न रहनु विद्यालयको लागि गौरवको कुरा हो ।

संस्थापकको सदिच्छा र भावनाको कदर गर्दै आफ्नो परस्परा, संस्कृति र विद्याको प्रचारमा यो विद्यालय सदा सजग रहने छ भन्ने विश्वासका साथ विद्यालयको उत्तरोत्तर समुन्नतिको हार्दिक कामना गर्दछु ।

धन्यवाद !

(श्रीकृष्ण आचार्य)
उपकुलपति
महेन्द्र संस्कृत विश्वविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिः २०४६/१२/२८

शुभ–कामना

श्री हरिहर–संस्कृत तथा साधारण माध्यमिक विद्यालय खिदीम, अर्घाखाँचीले आफ्नो स्वर्ण जयन्ती समारोह मनाएको परिशिष्ट वर्षमा हाल "स्मारिका प्रकाशन गर्न लागेकोमा ज्याद‍ै हर्षित भएको छु ।

यस प्रकारले "स्मारिका" प्रकाशन गर्दा देशको शैक्षिक क्षेत्रमा राष्ट्रिय शिक्षा नीति अनुरूप संस्कृत वाङ्मयको विकास र सम्वर्द्धन गर्नमा महत्वपूर्ण योगदान पुग्न जाने आशा एवं विश्वास लिंदै विद्यालयको उत्तरोत्तर प्रगतिको शुभ-कामना व्यक्त गर्दछु ।

(अच्युतराज रेग्मी)
शिक्षा तथा संस्कृति मन्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिः २०४७/२/२९

शुभ–कामना ।

श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयको सुवर्ण जयन्तीको उपलक्ष्यमा स्मारिका प्रकाशन हुन लागेको कुरा थाहा पाउँदा खुशी लागेको छ । वि०सं० १९९४ मा संस्कृत प्रेमी स्व० हरिहर उपाध्यायद्वारा स्थापित यस विद्यालयले नेपालमा संस्कृत शिक्षाको क्षेत्रमा ठूलो योगदान पुऱ्याएको कुरा सर्वविदितै छ । यस विद्यालयबाट विद्या आर्जन गर्नु हुने महानुभावहरू अहिले देशका विभिन्न क्षेत्रका महत्त्वपूर्ण पदहरूमा संलग्न रहनु विद्यालयको लागि गौरवको कुरा हो ।

संस्थापकको सदिच्छा र भावनाको कदर गर्दै आफ्नो परम्परा, संस्कृति र विद्याको प्रचारमा यो विद्यालय सदा सजग रहने छ भन्ने विश्वासका साथ विद्यालयको उत्तरोत्तर समुन्नतिको हार्दिक कामना गर्दछु ।

धन्यवाद !

(श्रीकृष्ण आचार्य)
उपकुलपति
महेन्द्र संस्कृत विश्वविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपकुलपतिको कार्यालय

२०४६/५/१८

शुभकामना

अर्घाखांची जिल्लाको खिदीमबाट शिक्षाको क्षेत्रमा महत्वपूर्ण योगदान पुऱ्याइरहेको श्री हरिहर-संस्कृत तथा साधारण माध्यमिक विद्यालयले २०४४ साल पौष १ गतेका दिन ५० वर्ष पूरा गरी आफ्नो सुवर्ण जयन्ती मनाएको सुसमाचारले मलाई अत्यन्त हर्षित तुल्याएको छ। यस विद्यालयले लामो समयदेखि ज्ञानको ज्योतिलाई प्रज्योलित राख्न गरेका प्रयासहरूको म हार्दिक सराहना गर्दछु।

स्वस्थ शैक्षिक वातावरण, स्तरीय पठनपाठन र अनुशासित क्रियाकलाप कायम राख्दै विद्यार्थीहरूमा सद्ज्ञान, सद्‌विवेक र सद्‌बुद्धिको अभिवृद्धि गर्न यस विद्यालयलाई सदा सफलता मिलिरहोस्: यही मेरो हार्दिक शुभकामना छ।

महेशकुमार उपाध्याय
उप-कुलपति
त्रिभुवन विश्वविद्यालय

विद्या

विद्यानाम नरस्य रूपमधिकं प्रच्छन्न गुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्यागुरूणांगुरूः
विद्या बन्धुजनो विदेशगमने विद्या परंदैवतं
विद्याराज सुपूजिता ननुधनं विद्याविहीनः पशुः १
शास्त्रोपस्कृतशब्द सुन्दर गिरः शिष्यप्रदेयागमाः
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।
तज्जाड्यं वसुधाऽधिपस्य कवयस्त्वर्थं विनापी श्वराः
कुत्स्यास्युः कुपरीक्षका हिमणयो यैरर्घतः पातिताः २

भर्तृहरि राजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री ५ को सरकार

शिक्षा तथा संस्कृति मन्त्रालय

केशरमहल ।
काठमाडौं, नेपाल ।
मितिः २०४७।१।९

शुभ-कामना

श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालय, खिदीम, अर्घाखाँचीले २०४४ पौष १ गते आफ्नो ५० वर्ष पूरा गरी स्वर्णजयन्ती मनाएको र सो उपलक्ष्यमा स्मारिका प्रकाशन गर्न लागेकोमा मलाई खुशी लागेको छ ।

विद्यालयले विगत वर्षहरूमा जस्तै आगामी वर्षहरूमा पनि राम्रो शैक्षिक स्तर कायम राखी देशलाई आवश्यक पर्ने दक्ष जनशक्तिको उत्पादनमा महत्वपूर्ण भूमिका खेल्ने छ भन्ने कुरामा विश्वास लिएको छु । साथै शिक्षा क्षेत्रको आधारभूत आवश्यकता पूर्ति गर्ने क्रममा समेत त्यस विद्यालयको ठूलो योगदान रहनेछ भन्ने विश्वास गर्दै विद्यालयको उत्तरोत्तर प्रगतिको कामना गर्दछु ।

रमेशजङ्ग थापा
का० मु० सचिव
शिक्षा तथा संस्कृति मन्त्रालय

भोगे रोग भयं कुले च्युतिभयं वित्तो नृपालाद्भयं
माने दैन्यभयं गुणेखलभयं रूपे जराया भयम्
शास्त्रे वादिभयं वले रिपुभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयावृतं भुवि नृणां रामाश्रयो निर्भयः
भर्तृहरि सूक्तिः

नमस्यामो देवान्ननु हत विधेस्तेपि वशगा
विधिर्वन्द्य; सोऽपि प्रतिनियत कर्मैकफलदः
फलं कर्माऽयत्तं किममरगणैः किंच विधिना
नमस्तत्कर्मभ्यो विधिरपि न एभ्य : प्रभवति,
कर्म (विकाश) वादःभर्तृहरेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

महेन्द्र संस्कृत विश्वविद्यालय

वाल्मीकि विद्यापीठ

हार्दिक शुभेच्छा

श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयको "स्वर्ण जयन्ती" का अवसरमा स्मारिका प्रकाशित हुन लागेको थाहा पाउँदा वाल्मीकि विद्यापीठ परिवारलाई विशेष खुशी लाग्नु स्वाभाविक हो । उदारमना स्व. हरिहर गौतमको सत्प्रयासबाट संस्थापित सञ्चालित हरिहर पाठशालाको संस्कृत जगतमा विशिष्ट योगदान रहेको तथ्य सर्वविदित छ । भविष्यमा पनि यस विद्यालयले आफ्नो मौलिकता र विशेषता कायम गर्न सफलता प्राप्त गरोस् भन्ने हार्दिक शुभेच्छा व्यक्त गर्दै स्मारिका प्रकाशनको लागि बधाई ज्ञापन गर्दछु ।

डा. माधव भट्टराई
का. मु. प्राचार्य
तथा
वाल्मीकि विद्यापीठ परिवार, काठमाडौं

चिदणु मात्रं नित्य मेकं ब्रह्म बहुधा भवन्महद्ब्रह्माण्ड स्वरूपं जात मिति वेदान्त मतं वैज्ञानिक विदुपान्यूटने-नाऽपि सूक्ष्मतराणी पूर्वं त्रयोदश शून्यै ऋणीकृते यदवशिष्यते तत् सत्यं, अविभाज्य चिद् वर्तते । तेषामणूनां प्रकति श्लेषेण निर्मितं विश्वं नश्वरम्, यत्पुनर्विभिद्याऽणौ परिणमते, इति विचारान्वेषिणाऽध्यात्मिक वेदान्त दृष्टेः पुष्टि विधीयते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय-सूची

पृष्ठां

संपादकीयाशयः

१. शुभकामना पत्राणि

२. प्रधानाचार्यः श्री पं. दधिराम मरासिनीः १

३. विद्यालयसंस्थापकः श्रीहरिहर गौतमः ३

४. विद्यालयस्येतिहासः ५

५. सुवर्ण जयन्ती समारोह कार्यक्रमः १३

६. अन्येषां महाभागानामपि जीवन वृत्तान्ताः लेखाश्च १६

७. स्वीकृतिकालाद्वर्तमान प्र. अ. श्री नारायण गौतमः २५

८. खिदीम र तुदीम्–वासुदेव मरासिनी ३२

९. अन्तर आत्माको विकास गरौं—भाष्कर प्रसाद गौतम ३३

१०. काशीतः योगी नरहरि नाथस्य पत्रम् ३४

११. नेपाल जर्मन संस्कृत संमेलन—नारायण गौतम ३५

१२. अतीतको दृष्टिपात—दामोदर गौतम ३५

१३. ऐतिहासिकी कविता—भीमकान्त पन्थी ३७

१४. विष्णुराज आत्रेयस्य पत्रम् ३८

१५. शुभ-कामना कविता—पद्मनाभ शर्मा ३९

१६. विद्यालयमा कार्यरत शिक्षक एवं कर्मचारी वर्ग ४०

१७. संस्कृतस्य सार्वभौम महत्वम्—हरि प्रसाद शर्मा आचार्यः ४२

१८. पाठशालाको अनुभव—विष्णुराज ज्ञवाली ४५

१९. सुरभाषाधिष्ठानं खिदीम पर्णेना क्षेत्रम्—डा. टीकाराम पन्थी ४७

२०. प्रेरणा र मेरोगति—नीलकण्ठ मरासिनी ४९

२१. स्वर र शिक्षाविधाका प्रथम शर्त—बाबुराम भट्टराई ५३

२२. हरिहर संस्कृत पाठशाला एक परिचय पुण्य प्रसाद अर्ज्याल ५४

२३. श्री हरिहर र उनको योगदानलाई म यसरी नै सम्झन्छु—मोदनाथ प्रश्रित ५६

२४. कमनीय कनकोत्सव—डा. राजाराम सुवेदी ५९

२५. फेरी आयो—नारायण गौतम ६१

२६. तिमी विद्यारुपी फूलबारीमा—सावित्री गौतम ६२

२७. जीवन यात्रा—नलराज शास्त्री ६३

२८. हरिहर विद्यालयको योगदान—भेषराज शर्मा ६६

२९. परिशिष्टेतिहासः—नारायण गौतम ६८

३०. श्री हरिहर पाठशालाको मेरो अनुभव—दुर्गा प्रसाद गौतम ७२

३१. ऐतिहासिकी गौतम वंशावली ७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

शुभ–कामना

श्री हरिहर संस्कृत तथा सा. मा. वि.,
खिदीम, अर्घाखाँची

श्री हरिहर संस्कृत तथा साधारण मा. वि. खिदीमले सुवर्ण जयन्तीको पुनीत अवसरमा स्मारिका प्रकाशन गर्ने निर्णय गरेको थाहा पाउदा हर्षानुभूति भयो ।

अर्घाखाँची जिल्लाको सबै भन्दा पुरानो विद्यालयको रूपमा यस भेगका ज्ञान पिपासुहरूलाई शिक्षाको उज्यालो घामबाट आलोकित गर्दै संस्कृत र संस्कृतिको संरक्षण र संवर्द्धनमा खेलेको भूमिका प्रशंसनीय छ । वर्तमानका शिक्षक, विद्यार्थी एवं अभिभावकको त्रिकोणात्मक चासो गुणात्मक शिक्षा दिने काममा यस विद्यालयले अग्रणि भूमिका निभाउन सकोस्—यही मेरो शुभ-कामना ।

अन्तमा, स्वर्ण जयन्तीको उपलक्ष्यमा स्मारिका प्रकाशित गरी विद्यालयको चिनारी दिन प्रयत्नशील सबैमा हार्दिक धन्यवाद ज्ञापन गर्दछु

तिलकराम पौडेल
जिल्ला शिक्षा अधिकारी
०४६।११।२५

विष्णुश्रितायस्तु सता शिवः सन्
स्वतेजसार्कः स्वधिया गणेशः ।
देवी स्वशक्त्या कुशलं विधत्ते
कस्मैचिदस्मै प्रणतिः सदास्तु ॥
३

अस्तव्यस्तत्व शून्यो निज रुचिकरं र्ध्वान्त नाशंप्रकुर्वन्
विश्वं वेश्मेव दीपः प्रतिहत तिमिरं यः प्रदेश स्थितोऽपि ।
दिक्कालऽपेक्षयासौ प्रतिदिनमटतस्तिग्मभानोर्नवारव्यां
यातः शातक्रतव्यां दिशि दिशतु शिवं सोर्चिषा मुद्गमोनः ॥
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिः २०४६/४/२०

शुभ–कामना

यस हरिहर संस्कृत तथा साधारण माध्यामिक विद्यालयले आफ्नो स्वर्ण जयन्ती समारोहको अवसरमा स्मारिका प्रकाशन गर्न लागेकोमा धेरै खुशी लागेको छ ।

राणाकालिन समयमा स्थापना भै नेपाली जनतालाई शिक्षाको दियो बालेको यस विद्यालयले **श्री ५ महाराजाधिराज सरकारको** 'शिक्षाको उज्यालो घामबाट कुनै पनि बाल बालिकालाई वंचित हुन नपरोस्' भन्ने उद्‌गारलाई मूर्तरूप दिई भविष्यमा अरु उत्तरोत्तर प्रगति गर्दै जाओस् मेरो शुभ–कामना छ ।

(रेवतीराज काफ्ले)
प्रमुख जिल्ला अधिकारी
अर्घाखाँची

कल्याणानां निदानं कलिमल मथनं पावनं पावनानां
विश्राम स्थानमेकं कविवरवचसां जीवनं सज्जनानाम् ।
पाथेयं यन्मुमुक्षोः सपदि परपद प्राप्तये प्रस्थितस्य
बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये राम नाम ।।

१

देवः किं वान्धवः स्यात्प्रिय सुहृदथवा ऽचार्य आहोस्वि दर्यो
रक्षा चक्षुर्नुदीपो गुरु रुत जनको जीवनं वीज मोज; ।
एवं निर्णीयतेयः क इव न जगतां सर्वथा सर्वदासो
सर्वाकारो पकारी दिशतु दशशता भीषुरभ्यर्थितं न;

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितिः२०४६/४/२९

शुभ–कामना

अज्ञान र अशिक्षाको अन्धकारवाट ज्ञानमय ज्योति फैलाउँदै देशको पश्चिमाञ्चल क्षेत्रमा शिक्षामा अग्रिणी भूमिका खेली "सुवर्ण जयन्ती" मनाएको श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालय, खिदीम अर्घाखांचीले "स्मारिका" प्रकाशन गर्न लागेकोमा विद्यालयका संस्थापक स्व० हरिहर गौतम प्रति हार्दिक कृतज्ञता ज्ञापन गर्दछु ।

"शिक्षाको उज्यालो घामबाट कुनै पनि नेपाली वञ्चित हुन नपरोस्" भन्ने **श्री ५ महाराजाधिराज सरकारको** महानवाणी पूरागर्न तथा सुख, शान्ति, संवृद्धी प्रदान गर्दै आधारभूत आवश्यकता पूरागर्न कदममा विद्यालयले सतत प्रयाश गर्ने आशा राख्दै विद्यालयको उन्नति एवं उज्वल भविष्यको हार्दिक शुभ–कामना व्यक्त गर्दछु ।

शोभाकर भूसाल
तथा
जि०पं० परिवार

श्री पञ्चायतन देव स्तुतिः

नमोऽस्तूष्ण रश्मे जगत्पालकाय प्रभामण्डल ध्वंसित ध्वान्तराशे !
सदानूतनाय प्रकाशैक धाम्ने जगच्चक्षुषे सर्वलोकाऽभिराम ! ।१
नमस्ते गणाधीश लम्वोदराख्य ! प्रचण्डात्मशक्तेऽन्तरायन्तराय,
जगद्र क्षणैकव्रताऽ मोघवीर्य प्रकाश प्रशान्त्वाऽहितास्त्रप्रवेष्ट ! ।२
नमाम्यादितेय प्रणूतांघ्रिपद्मां प्रभामण्डला क्षिप्त दैतेय शक्ति
स्वपादाश्रितंमाभव त्राणशक्ते तुषाराद्रि कन्ये मृडा न्यम्बिके च ।३
प्रभो नीलकण्ठ त्रिशूलिन् ! गजारे महेशाधिदेव त्रिनेत्राघनाशिन्
नमस्ते भवाब्धौ निमग्नैक पोत स्मरारे पुरारेऽवमा माशुतोष ! ।४
नमाम्यंघ्रि पद्मं मुरारे ! त्वदीयं स्वभक्तार्ति हारिन्प्रभो रामचन्द्र !
लसत्पीतवासाऽच्युताऽनन्त विष्णोः स्वपादा श्रितं मां हरे पाहिदीनम्

नारायण गौतमः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यालय संस्थापन कालीनः
प्रधानाचार्यः (हेड गुरूः)
महापण्डितः श्री दधिराम मरासिनिः (स्व.)

जीवन वृत्तान्तम्

अर्घाखाँची वामरूक ग्रामे जनित्वा खिदीमं निवसतोः श्री मणिराम मरासिनि खगेश्वरीदेव्योः पुत्रः श्री दधिराम मरासिनिः वि. सं. १९३६ वर्षे आषाढ कृष्णाऽष्टम्या मजायत, पंचमवर्षात् पितुरेवाऽक्षरमालां दुर्गाकवचार्गलाकीलक पूर्विकां सप्तशतीमधीतवान्, अष्टमवर्षे उपनीतः श्रीमहोदत्तब्रह्मचारी गुरोः श्री शुक्ल यजुर्वेद मध्यैष्ट, परन्त्वेतावता नतृप्तो व्याकरणादि शास्त्रीय विषयान्पठितुं योगशिक्षां चाभ्यसितुमुत्सुकः कास्की पोखरा सुप्रतिष्ठितं श्री पशुपति शर्माणं गुरुमुपेत्य लघुकौमुद्याः किञ्चित् प्रकरणं पठन् पुनर्भारत तुलसीपुर स्थितां संस्कृत पाठशालामुपस्थितः प्रतिभाशालिने तस्मै सपद्येव छात्रा ऽवास सौविध्यं प्रदत्तम्, परिश्रमी मेधावाँश्चसः वि. सं. १९५६ वर्षे प्रथमा परीक्षायां प्रथम श्रेण्या मुत्तीर्णः, तत्पश्चात् काष्ठमंडपं गतोऽपि स्व प्रतिभया शीघ्रमेव संस्कृत छात्रावासे प्रविष्टः श्री विष्णुहरि गंगादत्तादि गुरूसकाशात् व्याकरण, न्याय, वेदान्त, साहित्यविषयेषुगहन मध्ययनंकृतवान् । कवित्व शैल्या छात्रमण्डलेषु प्रभावशाली भवन् कवि शिरोमणिना लेख नाथ पौड्यालेन सहतु प्रतियोगितात्मिका प्रश्नोत्तरी चलतिस्म, वि. सं. १९६१ वर्षे वाराणसेय राजकीय सँस्कृत महाविद्यालयतः व्याकरण संम्पूर्ण मध्यमा परीक्षायां प्रथम श्रेण्यामेवोत्तीर्य गृहमागतः सः स्थानीय समाजैः श्री महापण्डित इत्युपाधिना संमानितः ।

तस्य ज्येष्ठ भार्यायां गङ्गादेव्यामेकः पुत्रः पुत्रीचैकाऽजनिषाताम्, कनिष्ठ भार्या ऽवीरा गोपी देवी दानीमपि रुरु क्षेत्रे निवसति ।

स्थानीयाऽढ्यतमो वर्दिया जनपद षोडशसहस्रविगाहा भूमिपतिः श्रीहरिहर गौतमः स्वशिष्यः किं करवाणीति पप्रच्छ, तस्मै सत्प्रेरणां ददन् श्रीगुरुः वि. सं. १९८१ तः खिदीम दशैंधर चत्वर काष्ठाटचां सामान्य संस्कृत पाठ शालां वि. सं. १९९४ वर्षतः ३६ छात्राऽवासीयां वेदव्याकरण संपूर्ण मध्यमा स्तरीयां वाराणसी राजकीय सँस्कृत महाविद्यालय संवद्धां श्रीहरिहर सँस्कृत पाठशालां प्रतिष्ठाप्य स्वयं तस्याः प्रधानाचार्यत्वं निर्वहन् पर्वत कन्दरालेष्यस्मिन्खिदीमे विशुद्ध शास्त्रीय शैली युक्तं वेद-व्याकरणाऽध्ययनं संचालितवान् ।

प्रति दिनं ब्राह्मे मुहूर्ते जागरितः स्नानसंध्यावन्दनपंचायतनदेवता पूजनपंच महायज्ञाद्याचारेण मध्याह्नपर्यन्तसमयमतिवाह्य पाठशालाप्रपंच निर्देशनं कवितालेखनं च तस्य दैनिकी चर्याऽसीत् । श्रीगुरोरनेकासु प्रकाशिताऽप्रकाशितसँस्कृत नेपालीकवितासु, श्रीराम चरितामृतम्, इदानीं त्रिभुवन विश्वविद्यालय सँस्कृत विभागाऽचार्य खण्डे पाठ्यत्वेन स्वीकृतं विद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि. सं. २००४ वर्षत: श्री हरिहर संस्कृत पाठशालाया: कार्यभारं स्वपुत्राय श्री धनञ्जय मरासिनि शर्मणे दत्वा स्वयमयं योगाऽभ्यासेऽयोजयत्, राजयोगमार्गेनेन महा चमत्कारिकीं सिद्धि प्राप्य समाधिष्ठस्थिति: साधिता, कदाचित्तु समाधेर्भावावे शेवद्धपद्मासनो भृकुटी दर्शने लीन श्चतुरंगुलं उत्थाय चरतिस्म ।

सत्संगतिमिषेण संगतान् स्थानीयवृद्धान् योगवार्तया धार्मिको पदेशेन च रञ्जयतिस्म ।

स्वजीवितस्याऽन्तिम क्षणं ज्ञात्वा काशी निवासाय गत श्चतुर्मासेष्वेव वि. सं. २०२० चैत्र शुल्क तृतीयायां ८१ वर्ष वयस्को मुक्तिपदं जगाम, इति—

संपादक:—

सत्य बोल, तर अप्रिय सत्य नबोल र अप्रिय झूठो पनि नबोल । यही नै सनातन धर्म पनि हो ।

— हितोपदेश

शरीर जलले पवित्र हुन्छ, मन सत्यले, बुद्धि ज्ञानले अनि आत्मा धर्मले पवित्र हुन्छ ।

— मनु

परिश्रमले सबै काम सिद्ध हुन्छ, केवल इच्छाले मात्र हुंदैन ।

— पञ्चतन्त्र

आफ्नो योग्यतालाई जतनसाथ राख, केवल प्रदर्शनको लागि त्यसको उपयोग नगर ।

— चेष्टर फील्ड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यालय संस्थापकः श्रीहरिहर गौतमः

जीवन चरित्रम्



तात्कालिक गुल्मी वि. सं. २०२१ त अर्घाखाँची परिणत जनपदस्य खिदीम पोखराथोक निवासिनोः श्री सुव्वा तारानाथ टीकाकुमारी गौतमयोः पुत्रत्वेन महोत्तरी जलेश्वरे वि. सं १९५८ वर्षे अत्रिकुले जातः श्रीहरिहरो वाल्यावस्थायामेवातीव चतुर : सच्चरित्रः क्रिया शीलो भव्य मूर्ति श्चासीत्, समये श्री महा पंडित दधिराम मरासिनि गुरू द्वारा व्रतवन्धेन संस्कारेण गायत्रीमन्त्र दीक्षितः प्रारम्भिक रुद्री वेद व्याकरणैश्च शिक्षितः स्वल्पेसमये सनातनाऽध्यात्म चरित्र विचारस्य मर्मज्ञोऽभूत् समयाऽनुसारं पैतृक संपत्ते र्वदियादशग्राम्भूमेरुपरि वहुकर्तुं महत्वाऽकाँक्षी स प्रौढावस्थायां शनैः शनैः सन्नद्धः खिदीमे वाँके- वर्दिया- कपिलवस्तौ- काष्ठमण्डपे- त्रिशूल्यां दाङ प्रदेशेच भूमिविस्तारमकरोत्, २०२१ विवर्षे वर्दिया रेखांकन क्रमे नियुक्ता अधिकारिणोभू विवरण पत्रंगृह्णन् हरिहरस्य सर्वां संमेल्य १६००० विगाहा वर्तत अतस्तं वहु क्षेत्राधिर्ति (इलाकेदार) इति चर्चितवन्त; तस्य चतासृणां पत्नीनांमध्ये तृतीयाया गणेशकुमारी देव्यागर्भतो द्वौ विष्णुहरि लक्ष्मीहरि पुत्रावजनिपाताम् प्रासाद सदृशे वन्धुश्री भवने कूपयन्त्र निष्पादिता विद्युद्दीपा गगने तारका इव भान्ति। गजवन्धिन्यांः पंच दन्तिनः यानाऽगारे पंच मृत्तराः मन्दुरायां शतशोघ्रोटकाश्च सुमुल्लसन्ति, हरिहरः २०२० कल्पे समये सर्वकाराय सप्त लक्षं करं विनयन इति श्रूयते. वि. सं. १९८१, ८५, ८९ वर्षे क्रमशः पोखराथोक, हर्राबोट, मालिकेति स्थान त्रये गुरू दक्षिणा पूर्विका स्तिस्रः प्रारंभिक पाठशालाः स्थापयन् खिदीमं शिक्षा क्षेत्रं करोतिष्म ततोऽपि विशेष शास्त्रीय विषय विस्ताराय श्री गुरू पं. दधिरामतः सत्प्रेरणां प्राप्तः सः वि. सं १९९४ मार्ग शुक्ल पंचमीस्वजन्म दिवसे पूर्वोक्त पाठशालात्रय समष्टि रूपेण पोखराथोक एव सप्त गुरुणां सप्त त्रिंशच्छात्राणा ञ्श्चावास भोजन परिधान (छत्रोपानत्पुस्तक लेखनी कर्गज वर्तीविष्टर व्यवस्था सहितां श्रीहरिहर संस्कृत पाठशालां प्रतिष्ठाप्य वाराणसी गभर्नमेंट संस्कृत कलेजेन सह संवन्धितवान्, तेनैवतत्र पाठ्यक्रमाः परीक्षा नियमांः सूचना आंवेदन पत्राणि समागमन्, एवं वि. सं. १९९९ वर्षतः ०३ पर्यन्तेपु पंच सत्रेपु वेद व्याकरण विषये पंचाशदधिकांछात्रान् संपूर्ण मध्यमा (प्रमाणपत्र) परीक्षाया उत्तारयामास। वि. सं. २००४ समयादत्र स्ववर्षवृद्धिक्रमेण संकलितानां पश्चाशच्छात्राणां पूर्वोक्ताऽवासादि सौविध्यपूर्णां प्रथमा परीक्षा- मध्यकौमुदी, कोष, काव्य, तर्क नीति मूलरामायणैतिहासिक विषयकान् ग्रन्थान् गुणस्तरीयतया पाठयितुं मूलपाठशालां स्थिरीकृत्य वाराणसी ग्वालीयर मन्दिरे पुनः सवृत्तिकानां शतच्छात्राणां श्री कृष्णमणित्रिपाठी दामोदर भट्टराई शेषराजशर्मा प्रभृति गुरुभ्यो वेद,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याकरण, न्याय, ज्यौतिष, वेदान्त, साहित्य विषयेषु संपूर्णमध्यमापरीक्षो त्तारयित्रीं विस्तीर्णां शाखापाटशालां संस्थापयामास । स्वयं छात्रप्रियः सः प्रतिनव रात्र छात्रान् वन्धुश्रीमाहूय चंडी वेदं पाठयित्वा विपुलदक्षिणां यातायात व्ययं चदत्वाप्रेषयतिस्म एवं वि सं. २०२१ वर्षपर्यन्तं सहस्र शो विदुष उत्पाद्य देशस्यैव शिक्षाक्षेत्रे किमपि साहाय्यमकार्षीत् (वि. सं. ०४२ वर्षे वाल्मीकि विद्यापीठे संस्कृत प्र. अ. गोष्ट्यां १५३ विद्वत्जनेषु ३१ विद्वांसः श्री ह.सं. पाठशालायां छात्रा आसन् । एतेन शिक्षाया प्रतिशतं हरिहर संवेति मूल्यांकितम् । इदानी-मपि सर्वकार कार्यालये एकद्विजनाः कर्मचारिणो वर्तन्ते, । वि. सं. १९९२ वर्षे डांडा कटेरीतः कोप्चा पर्यन्तं छाने मार्दे कौगके पर्यन्तं मार्गनिर्माया ऽभूनपूर्वं खिदीम पाल्पा संयोजनं सुगमं कृतवान्, मध्यदेशं गन्तुं दुर्गमो दहमार्गो-ऽपि विस्मारितः— धार्मिकेप्रवृत्तौ सदा संलग्नः प्रातः सायं होरात्रयं स्नान संध्या पूजा पाठ बलिवैश्वदेव पितृतर्पण नित्य गोदानादि कार्ये स्वयं जागरूकः पुत्र भ्रात्रादि परिवेशस्थाँश्चजनान्सच्च रित्रतायै प्रेरयन् दिवाकाले हस्त्यारूढः परिभ्रम्य कर्मचारी कृतां स्वग्राम व्यव स्थितिं हीरकात्तिल पर्यन्तं स्वयं पर्यवेक्षते, कीर्ति करेपि कार्ये रुचिं दधानः वि.सं. १९९७ वर्षे शीतकालिक धर्म सेवनाय गोजिह्विका ऽलुक व्यंजन भोजनं च निमित्ती कृत्य सर्व परिच्छदं (गुड ओदनं पचा भाण्डमार्जका भोजन भाण्डानि विष्टर पुस्तकादि सहितं विद्यार्थिनः) पाठशाला संचालनं खिदीमतः बढ्नपुरा तौलिहवा मार्गेण भारत शोहरतगड- निशानगाढा पर्यन्तं रैलयानेन ततः शकट यानेन बन्धुश्रीभवनं प्रापयित्वा जटिल परीक्षया छात्रांस्तक्षयित्वा पुरस्कार दण्डं च दत्वा, कोटीहवन पूर्वकं गायत्री पुरश्चरणं. १०८ शय्यादानं, सहस्रमृल्लिङ्गार्चन शतरुद्रियैः शिवाराधनं तडागप्रतिष्ठया पशुपक्षीत्यादि सेवन महायज्ञं विधाय दक्षिणा शय्यदिभिर्गुरून् विद्यार्थिनोऽन्यान्ब्राह्मणांश्च सन्तोषयन् खिदीममेव प्रास्थापयत्, पर-स्मिन्वर्षे गृहंगत्वा गायत्री लक्षहवन, धान्यपर्वत मृल्लिङ्गार्चन शतरुद्रियैः विश्वेशाराधनं कृतवान्, कदाचित् कूपे-पतितमेकपण मुद्धारयितुं पञ्चाशद्रूपक्यक व्ययो जात । कर्मकरैः किं स्वामिन् ! क्षुद्राय वहुव्ययः समुचितः ? इतिपृष्टः पणमेकं निरर्थकं गतमासीत् तस्योद्धाराय कृतं सदुपयुक्तमित्युत्तरं ददौ । ०२२ मार्गे स्वयं हरिहरे दिवंगते श्री पञ्चसर्वकार स्वीकृतायाः श्री हरिहर संस्कृत माध्यमिक (कक्षाष्टमी) पाठशालायाः श्री विष्णुहरि गौतमः सं. समितेरध्यक्षोभूत्वा पुनरूद्घाटनं विधाय भातृ–सपत्न पितामहीभ्यामनुमोदितः कपिलवस्तु ठू. पिपरा ग्रा. पं. स्थिता स्व स्व भोग्या ६८ विगाहा भूमिः पाठशालायै प्रदत्तवान्, श्री ५ सर्वकार भूमिप्रशासनः ५१ विगाहां पाठशालानाम्नि स्थिरीकृत्य १७ विगाहां वनसीमाऽनुत्पादिक (डिमार्केशनैलानी) मिषेण स्वयमधिजग्राह, तथापि पाठशालाऽधिराज्ये चतुर्थी वा पंचमी घनवतीति कथ्यते इत्थं ०३१ वि. वर्षे नव शिक्षायोजना चक्रे समीपस्थं श्रीराम वि. हाइस्कूल संयोज्य श्रीहरिहर संस्कृत तथा साधारण मा. वि. खिदीम नाम्ना वर्तमानोऽधिराज्यएवाऽ भूतपूर्वःसन् नेपालीयानां भौतिकाऽध्यात्मिक मार्गद्वय दर्शकः संजातः एतत्सर्वं श्री पं दधीराम गुरोराशीर्वाद प्राप्तस्य श्री हरिहर गौतमस्याऽमरकीर्ते दीपकं विद्यते ।

संपादकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यालयस्येतिहासः

वर्तमानस्य श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयः खिदीम अर्घाखाँची स्थितस्य मूल-पृऽठभूमिः १९८१ विक्रम वर्षे श्रीहरिहर पाठशाला नाम्ना खिदीम पोखराथोक दशैंघर काष्ठाटचां प्रतिष्ठितः- तत्र श्रीकेशवराज मरासिनि गुरूः अस्मान् ग्रामीण वालान् तात्कालिक पाठ्य (ठूलो वर्णमाला- दुर्गाकवच चडी- रूद्री-वेद-व्याकरण–ज्यौतिष) क्रमानुसारं निःशुल्कं अध्यापयतिस्म । पाठशाला संस्थापकः स्व. श्रीहरिहर गौतमः गुरवे सुयोग्यां मासिक दक्षिणां ददाति, स्वयं निरीक्षणंकृत्वा समुत्तीर्णेभ्यः पारितोषिकं च वितरति, वालिकाः पाठशालायां पठितुं संकोचन्ते परं गृह एव पितृ भातृ सकासात किंचित् साक्षरा भवन्ति ।

सप्त वर्षान्तरात् १९८७ वि. वर्षे श्री केशव गुरौ स्वयं पठितुं काशीं प्रस्थिते अस्यां पाठशालायां पं. टीकाराम मरासिनि गुरू नियुक्तः पूर्वोक्त पाठ्यक्रमोपरि लीलावती गणितं स्वमौलिक रीत्या सरलं रूचिकरंच विद्यावास्मान् पाठयन् वंशपत्र लेखकान् ग्रामीणान् वराणसेय कर्गज- लेखनीं च दर्शयित्वा चकितान् करोतिस्म ।

वर्षद्वय समयं १९८९ यापयित्वा सोऽपि गुरूः कांशीं प्रत्येव गत इति रिक्त पदेऽस्मिन् श्रीघनश्याम पौड्याल गुरू नियुज्य प्रचलिता ध्यापन परंपरां सुचारू संचालयन् विशेष वैद्यक प्रयोगेऽ प्यस्मान् नियोजयतिस्म, स्वयं स्थानीयान् रूग्णानुपचरन् गुणग्राह्यो लोकप्रियश्चासीत् ।

एवं गतेषु द्वि (१९९०) वर्षेषु अस्याएव दशैंघर पाठशालायाः सन्निरीक्षणे खिदीम हर्रावोट स्थाने श्री पं. रमानाथ पौड्याल गुरूत्वे तथा खिदीम मालिका मन्दिरे श्री पं वेदराज अधिकारी गुरूत्वे च द्वे पाठशाले वर्धिते- एवं खिदीम क्षेत्रे त्रिभुजा हरिहर पाठखालाः सामयिक पाठ्य प्रणाली सहिताः संचालिता इति खिदीमं शिक्षा क्षेत्रं परिकल्पया ञ्चक्रुः- यासु खिदीम स्थिताः सर्वे वालका वाह्यतोऽपि संवन्धि वान्धवाः संमिल्य शिक्षार्जनं निः शुल्कं कुर्वन्तिस्म ।

इतः पर निरीक्षण परीक्षण प्राणाल्यपि किंचित्सूधृतासती प्रतिपूर्णिमायां समदूरे व्याघ्रवागुरा चत्वरे त्रिकोणपाठशालायाः गुरूपूर्वका श्छात्रा : संमिल्य परस्पर गुरवो मौखिकं परीक्षन्ति, प्राप्ताङ्का भिलेखं हरिहर समक्षं प्रेषयित्वा समुत्तीर्णेभ्यो वाग्लुङ्ग कर्गज पुरस्कारं च दापयन्तिस्म, तत्र परीक्षा सङ्कुले शिरः पोटलिका व्यापारः- त्रिपाठशालीय विद्यार्थिनां विनाक्रोध–क्रूरताकारणो मुष्टमुष्टी संमर्दश्च चलतिस्म ।

यद्यपि खिदीम प्रदेशः प्राचीनसमयादेव व्याकरण, ज्यौतिष, आयुर्वेदाचार्याणां महापण्डित कविराज इत्यु-पाधिभिर्लब्धप्रतिष्ठानां विदुषां निवास आसीत् तथापि ग्रामीण परिस्थितित्या सामयिक परंपरया च वहुशो निरक्षराः कृतवेद श्रवणमात्रा श्चासन्, परंएताभि र्हरिहर पाठशाला भिरनेके वालकाः शिक्षोन्मुखा विहिताः

इतीयं प्राक्कालीना स्थितिः खिदीम पाठशाला त्रय्याः– एवं चतुः पंचवर्षेषु व्यतीतेषु स्थानीय विद्याप्रे-मीणामाकांक्षयां महापण्डित श्रीदधिराम मरासिनि (स्वगुरोः) सत्प्रेरणया च देशस्यैव किञ्चित् शिक्षापूर्ति-मन्वानः श्रीहरिहर गौतमः १९९४ मार्गशुल्क पंचम्यां (स्वजन्म) तिथौ श्री पं. दधिराम मरासिनि गुरोरेव प्रधा–नाचार्यत्वे श्री पं. रमानाथ पौड्यालः श्री पं घनश्याम पौड्यालः श्री पं. रामजीप्रसाद गौतमः श्री पं यदुनाथ अर्यालानां पञ्च गुरूणां सहाध्यापकत्वे च व्याकरण पाठिनां २७ शुल्क यजुर्वेदाध्यायीनां ९ पूरकेणंकेन समं हरिहर वयः क्रमेण वर्द्धिष्यमाणानां दूरसुदूराऽ गतानां ३७ छात्राणां भोजन परिधानीय, (छत्रोपानत्सहित) पुस्तक लेखनी कर्गजवर्ती विष्टर समेतं छात्राऽवासं परिकल्प्य वाराण.सेय संस्कृत संपूर्ण मध्यमा परीक्षा (इदानी नेपालेप्रमाण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Domain. Digitization by eGangotri.Funding: MIDF

पत्र कक्षा) ऽनुसारं पठन पाठन व्यवस्था सहितां पूर्वोक्त पाठशाला त्रय्याः समष्ठिरूपां श्री हरिहर संस्कृत पाठ–शालां महता समारोहेण संस्थापितवान् । उक्त छात्रावासीय भिन्नाः शतशोवयं ग्रामीणा अपि निः शुल्कं सपुस्तक लेखनीं प्राप्य समानाध्ययन सौभाग्यं लब्धवन्तः ।

एतयैव समय गणनया २०४४ मार्ग २८, २९ पौष संक्रान्तौ संविधान दिवसे विद्यालयस्य पञ्चाशद्वार्षिकी सुवर्ण जयन्ती, समारोहः संमानितः ।

इत्थमस्मिन्पर्वत कन्दरालेऽपि खिदीमे विशुद्धरीतिकस्य श्री शुल्क यजुर्वेदाऽध्ययनस्य, वा ाणसी–शैलीयुक्तस्य शास्त्रीय व्याकरणाऽध्ययनस्याऽ पि चर्चा देशस्यसभ्याऽ सभ्य समाजे विस्तीर्णा ।

तत्पश्चात् १९९६ वत्सरे कास्की पोखरा विन्ध्यवासिनी परिवेश निवासी श्री पं. टङ्कनाथ पराजुली व्याकरणाचार्यः सिद्धान्त गुरुरूपेण नियुक्तः षडगुरू मण्डलः संजातः ।

एवं १९९७ पौषमासे श्रीगुरुप्रमुखा वर्षवृद्धचा ४० छात्राश्च सपरिच्छदाः शिशिर धर्म सेवनोद्देश्येन भारत (गोहरतगड- निशानगाडा) धूमयानमार्गेण हरिहर पाठशालायाः, कीर्ति विस्तारयन्तो वर्दिया जनपदे बन्धु श्रीति हरिहर भवने अस्थायि स्थानान्तरीकृता तत्र हरिहर समक्षे जटिल वाक्परीक्षाया निर्गताः पुरस्कृता दण्डिताः भर्त्सिता श्च वयं छात्राः श्रीहरिहर महायज्ञस्य (गायत्रीपुरश्चरणपूर्वकः पञ्चाशल्लक्षहोमः– अष्टोत्तरशत शय्यादान– शतरुद्रीयागः– पश्चिम भवन प्रतिष्ठा– तथा लक्ष्मीहरि– व्रतबन्ध संस्कार समारोहेषु सहकारिणो दर्शकाश्च भवितुं प्राप्तावसराः स्मः ।

अस्मिन्नेव समारोहान्तराले एकोऽन्यो दिवाकर ठाकुर ज्योतिषाचार्यः (मैथिलीगुरुः) नियुक्तः- दशजना ज्योतिषाध्यायिनश्छात्राश्च वृद्धिङ्गताः– इत्थं गुरुसप्तकः ३७+३+१०=५० आवासीय विद्यार्थिनश्च संभूय चैत्र मासे पुनः खिदीम पाठशाला भवन एव स्वस्थानीकृताः, इदानीमेषाऽत्र पाठशालायां श्री योगि नरहरिनाथ आगत्य श्रीगुरुभिः सहशास्त्रार्थमकार्षीत्, परं वयं मर्ममजानाना मुग्धाइव चकिताः श्रवण मात्रेण सन्तुष्टा आस्म ।

एतदन्तरे हरिहरो भारतेन समन्वयं कुर्वन्, श्रीहरिहर संस्कृत पाठशालाया गभर्नमेण्ट संस्कृत कलेज वराणसी सहसंबन्धं स्थापितवान्, तस्य एव पाठ्य परीक्षाक्रम अग्रे प्रसृतः परीक्षाऽऽवेदन पत्रं नियमाश्चात्रैवा गच्छन्तिस्म ।

इत्थं १९९९ विक्रमवर्षे प्रथमवारं अस्या पाठशालायाः साकाशात् ज्ञानहरि, पुष्पनिधि नामकौ द्वौ विद्यार्थिनौ वाराणसेय संपूर्ण व्याकरण मध्यमा परीक्षायां संमिल्य सफल परिश्रमावभूताम् । २००० वर्षेच व्याकरण संपूर्ण मध्यमा परीक्षायां दामोदर गौतमः, पुस्करनाथ पोखरेलः, वावु लाल (दिव्यदेव) ज्ञवाली, डिल्लीराज पौड्याल, गुरुप्रसाद आचार्यः भक्तिराम भट्टराई तथा शुक्ल यजुर्वेद संपूर्ण मध्यमा परीक्षायां नारा–यण गौतमः (वर्तमान प्र. अ. एवं अस्या लिपिलेखकश्च संमिलिता वहुश उत्तीर्णाः– परं भक्तिराम भट्टराई द्वितीय पत्र दिवसे ज्वरार्तो मञ्चात्पतितः परीक्षा कर्मचारिभिः कौडिया औषधालये संभृतः परास्मिन वर्षे परीक्षां पूरया–मास ।

एतावता क्रमेण २००१, २, ३ वर्षे भीमकान्तपन्थी अनिरुद्र खनालः कुलचन्द्र सुवेदी, रुद्रनाथ आचार्यः– गङ्गादत्त - भेषराज तोयनाथ ज्ञवालिनः कृष्णदेव मरासिनि प्रभृतयोऽनेके समुत्तीर्णाः परं तत्राऽन्तिमे सत्रे परीक्षा-भ्यन्तर एव हिन्दू यवन संघर्षो विघ्नं चकारेति ।

इतः पश्चात् श्रीसिद्धान्त गुरुः स्वावकाशमादाय गृहं गतः– पूर्वमेव ज्योतिष गुरू दिवङ्गत आसीत्, रमानाथ पौड्यालः, रामजीप्रसाद गौतमश्च द्वौ गुरू स्वेच्छाऽवकाशं यातौ, तेनाऽत्र संपूर्ण मध्यमा पठन पाठन व्यवस्था व्यस्ता इति हरिहर गौतम इत्थं सरणीं गतवान् यतः–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र खिदीम भवने श्री पं. दधिराम गुरोर्निर्देशने श्री पं. धनञ्जय मरासिनि (नव नियुक्त) गुरोः प्रधानाध्यापकत्वे श्री पं. घनश्याम गुरोर्मध्य कौमुदी पाठने श्री यदुनाथ गुरो वेंदाऽध्यापने ३७+८+१० = ५५ छात्र व्यवस्थितौ मध्यकौमुदी सहविषयैं र्वाराणासेय प्रथमा परीक्षा साधिकां मूलपाठ शालां स्थिरिकृत्य अस्या एव प्रवृद्ध शाखारूपा ५० छात्रवृत्ति सहिता श्रीकृष्णमणि त्रिपाठी प्रधानाऽध्याण्कत्वे पं. दामोदर भट्टराई पं. शेषराज शर्मा सहाध्यापकयुक्ता श्रीहरिहर संस्कृत पाठशाला वाराणसी शाखा- रामघट्टस्थ ग्वालीयर मन्दिरे व्यवस्थिता पञ्चाश द्विद्यार्थीनां भोजनाच्छादन निवासा स्तत्रैव भवन्ति, खिदीमतः प्रतिवर्षं प्रथमापरीक्षामुत्तीर्य वाराणसी शाखायां सङ्गताश्च शतशश्छात्रा वेद–व्याकरण- ज्यौतिष-दर्शन–साहित्य विषयेषु संपूर्ण मध्यमा परीक्षामुत्तर्तुं लब्धावसराः सजाताः-हरिहर एतान् शारदिक पर्वणि बन्धुश्रीं आहूय दक्षिणा पुरस्कारैश्च वर्धयित्वा प्रेषयतिस्म, असौक्रमो दीर्घकालं प्रचलितः-, काष्ठमाण्डप स्थिते हरिहर भवने छात्राऽवासीय सौविध्यं प्राप्ताः २५ विद्यार्थिनः– रानीपोखरी सँस्कृत पाठशालायाः प्रथमापरीक्षा पूरण सम कालमेव हरिहर छात्रवृत्ति व्यवस्थया वाराणसी शाखायां मिलित्वाऽग्रे पठनाऽवसरं लब्धवन्त– एवं त्रिकोणान्मिलिताः प्रतिवर्षं शतशः परीक्षायां संमिलन्ति, एतावतीभिर्व्य-वस्थाभिः श्रीहरिहर संस्कृत पाठशालातः न्यूनाधिक शिक्षिताः १६०० विद्यार्थिनः स्वेच्छानुसारं केचिदुश्च शिक्षार्जने लग्नाः केचित् श्री ५ सर्वकार सेवासु प्रसक्ता, अपरेदेश विकाशस्य विभिन्न क्षेत्रेषु विनियुक्ता, अन्ये च वहुशः स्वगृह व्यापार कुशलाः प्रायशः प्राज्ञश्रेणी ष्वेव गन्यमानाः संजाताःइति२०१९।१।४ दिवसे गुल्मी भ्रमणक्रमेण खिदीम पाठशालां गतिविधि निरक्षमाण स्तात्कालिक शिक्षा उपमन्त्री श्री कीर्तिनिधि विष्ट महोदय उद्गीर्णवाना-सीत्, इतोपि २०२१ परीक्षासत्र पर्यन्त समये श्रीहरिहर संस्कृत पाठशालासकाशात् संपूर्ण मध्यमा प्रभृति शास्त्री आचार्यानुसन्धान परीक्षात्तीर्णाः विभिन्न सेवाकार्येपि संलग्नाः स्मृतिपथंयाताः केचित् प्रमुखा अत्र संस्मर्यन्तेः–

एतावतोऽन्यांश्चोच्चावचान् सविशेष शास्त्रीयमर्मविश्वधान्-सामयिक परंपरा ज्ञान संपन्नश्च सहस्त्रशो विदुष उत्पाद्य श्री ५ सर्वकारस्य शिक्षा क्षेत्रे किमपि सहयोगं कुर्वती समूल शाखाप्रशाखा श्रीहरिहर संस्कृत पाठशाला २०२१।१२।२३ दिवसतः सहसा विसर्जिता तत्र कारणयत्–स्वगुरोः श्री पं. दधिराम महोदयस्य विद्या-लयस्य विद्या विनोदि जीवन पर्यन्तं पाठशालां संचालयितुं कृतसंकल्पः शिष्यस्तत्पूर्वदिने गुरोर्दिवंगतस्य वार्षिक श्राद्धं सम्पन्न आसीत्- इति, इत्यमकस्मान्निरुद्धापि श्रीहरिहर संस्कृत पाठशाला २०२२।६।४ दिवसात् स्थानीयानामस्माकं शिक्षा विरहिणां प्रयासतस्तास्मिन् खिदीमस्थिते रिक्त भवनमात्र एव द्वौ स्वयंसेवकाध्या–पकौ २५ विद्यार्थिन श्च संभूय पुनः सजीवा इव संचालिता ।

हरिहरो वर्दियास्थित इमं वृत्तान्तं शृण्वन्नपि ०२२।८।२५। दिवसे स्वयं दिवङ्गत इति स्वयं सेवक प्र. अध्यापकेन श्री ५ सर्वकारं विनीय ०२२।१२।४ दिवसे श्री शिक्षा मन्त्रालय द्वारतः श्री हरिहर सँस्कृत माध्यमिक (मिडिल कक्षा ८–प्रथमा परीक्षा) पाठशाला खिदीम, नाम्ना आर्थिकानुदान सहिता राजस्वीकारिता, एतदनुसारं २०२२।१२।१४ दिवसे सुगठितायाः संचालक समितेरध्यक्षः श्री विष्णुहरि गौतमः– राजस्वीकृतायाः श्री हरिहर संस्कृत माध्यमिक पाठशालाया विधिवत् पुनरुद्घाट नंकुर्वन् स्वयंसेवा कालीनं प्र. अध्याकमेव नारायण गौतमं प्र. अ. पदे–२००४–२१ कालीन प्रधानाध्यापकं, धनञ्जय मरासिनि १९९४–३ कालीन सहाध्यापकं (प्राक्कालीन हर्रावोट पाठशालाध्यापकं च) रमानाथ पौडेलं सहाऽध्यापक पदे नियुज्य द्वि सहस्त्र रूप्यकैः सह श्री ५ सर्वकार शिक्षा प्रणाल्यनुसारं पाठशालासंचालनं कर्तुं निर्दिष्टवान्, तथैव स्वीकृतिपत्र सारांशं परियालयन् अध्यक्षपरिवारः (हरिहर माता योगकुमारी पुत्री विष्णुहरि--लक्ष्मीहरि गौतमौ) कपिलवस्तु जनपदस्थितां स्व स्वभोग्यां काममपि भूमि संपदं दिवङ्गतस्य स्व (पुत्र) पितुः श्री हरिहर गौतमस्य पुण्य स्मृतौ भृतिभरणं विनैम श्री पाठशालायै प्रदातुं कृत संकल्पः पाठ शाला संचालन--छात्रवृत्ति प्रदान--कार्यं विशेषतः प्रोत्साहितवान्--एतावता स्वपितुः श्री हरिहरस्य अमर कीर्ति मपि संलग्नां विहितवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्व प्रतिज्ञानुसारं श्री अध्यक्षपरिवारप्रदानतः प्राप्ता कपिलवस्तु जनपदान्तर्गत तात्कालिक ठूलो पिपरा ग्राम पंचायतान्तर २,८ विभागाङ्कित ग्रामयो निवुवा रमवापुरयोः (वठानुपुरेतिप्रसिद्धयोः) ६८ विगाहा परिमिता, भूमिः २०२३।१०।४ दिवसे श्री ५ सर्वकारस्य शिक्षा एवं भूमि सुधार मन्त्रालयाभ्यां श्री हरिहर सँस्कृत माध्यमिक पाठशाला नाम्नि संस्थापयितुं स्वीकृता, एतदनुसारं विभिन्नकार्य परिपाकतः २०२७।१२।१३ दिवसे कपिलवस्तु माल कार्यालयात् प्र. अ. संरक्षणे पाठशाला नामनि उपभोग प्रमाण पत्रं (वहाली दर्ता), पारितम् ।

तदा धारेण पाठशालया स्वां भूमि संपत्ति श्री ५ सर्वकार कर विनयन पूर्वकं वर्षद्वयोपभोगानन्तर तत्र जनपदे भूमि प्रसाशन व्यवस्था संलग्ना, तया पुरातन प्रमाणं (२०२६ वत्सरीणं भूमि रेखाङ्कनं पूर्वपरिवार नामन्येव भूस्वा ०२७ वत्सरे पाठशालायैविहित मिति) निलम्वितमपि पाठशालाया भोग अक्षुण्ण एव स्थितः– राज करश्च माल कार्यालये निक्षिप्तः, परं २०३२ वत्सरे भूमि प्रशासन कार्यालयतः पाठशाला नाम्नि नवीन प्रमाण पत्रं भूस्वामित्वं (जगा धनी दर्ता प्रमाण पुर्जा) अकितमपि ६८ विगाहा मध्ये ५१ विगाहा मात्रं पर्यवसितम्, १७ विगाहा भूमि वंनसीमा (डिमार्केश न, परिवन्धे त्रोटयित्वा सर्वकारेणैवाऽधिगृहीता ।

तत्पश्चात्सपद्येव २०२७-२८ वर्षद्वयोः संपूर्णायाः (६८ विगाहा) भूमेरेव कर विमार्जनाऽधारेण भोगेनच बलेन त्रुटिताऽपि सा १७ विगाहा भूमिः पुनः पाठशालायै प्रत्यावर्तिता भवेदिति शिक्षा एवं वनमंत्रालययो स्तथा राष्ट्रिय शिक्षा समितौ, विद्यालय संपत्ति संरक्षण व्यवस्थापक केन्द्रीय समितौ च विनिवेदनं कृतमपि न कान्त्कािकार्यवाहिका प्रचलिता, परन्तु-इतो भूम्यन्तरे खण्डोपखण्डेषु व्यतिरिक्त विद्यालय संचालका विभिन्न व्यक्तयश्चोतकोच प्रदान परिपाटचा स्व स्व नाम्नि अवैधाङ्कनं कृतवन्त इति श्रुत्वा सपद्येव जि. क. व. माल जि. का. क. व. तथा लुम्बिन्यञ्चलाधीश कार्यालयेषु उक्ताऽवैधाङ्कनं निष्क्रियंकृत्वा ०२७ संवत्सरीणोप भोग पत्राऽधारेण श्री पाठशाला नामन्येव भूस्वामित्वं स्थिरी करणीयमिति विनिवेदने कृतेऽपि सर्वेषु मौनेषु सत्सु २०४२।६।२१ दिवसे इत्थं केनाप्यवैधाङ्कने कृतेऽपि श्री ५ सर्वकाराऽधिगृहीता सा १७ विगाहा भूमिः पुनः वर्तमान श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयाय प्रापयितुं सम्बन्धितेषु कार्यालयेषु श्री ५ महाराजाधिराजाज्ञां प्राप्नुयामिति राज्ञः समीपे विनतीपत्र समर्पिते इदानीं जि. पं. स. शिक्षा शाखा अर्घाखाची कार्यालयं संबोध्य एतस्मिन्विषये समुचित कार्यवाहिकं संराद्य अत्र राजप्रासादे परिणामं ज्ञापयित्वा विद्यालयोऽपि सूचनीय इति श्री ५ राजाज्ञा पारिताऽस्ते ।

अस्याएव श्री हरिहर संस्कृत माध्यमिक पाठशालाया नातिदूरे देशकाल परिस्थित्यनुसारं जनताऽवश्यकता पूर्त्यै २००८ विक्रमत एकोऽन्यः श्रीराम प्राथमिक विद्यालयः (साधारणः) श्री ५ सर्वकार द्वारा संप्रतिष्ठितः, तेन खिदीमे संस्कृत–साधारणयोर्द्वे धारे इत्थं प्रवृत्तो आस्ताम् ।

श्रीराम प्रा. वि. खिदीम, दर्शघर, स्थाने श्री ५ सर्वकार स्वीकृति पश्चात् प्रथमः शिक्षको नागेन्द्रनाथ गौतमः सं. समितेरध्यक्षो भरतमणि गौतमः सचिवो भानुभक्त गौतमश्चैतेषां कुशलाध्यापन संचालन परिपाटचा सन्तोष जनक परिणामोन्मुखे दृष्टे २०१४ विक्रम वर्षे उक्त शिक्षकाय, कलेज अफ एजुकेशन, पाल्पा द्वारा नर्मल प्रशिक्षणं प्रापितम् तेन विगत कटिवद्धतायां नवीन गुणस्तरं संमेल्य सुदृढाऽध्यापन परंपरायां स्थितायां २०१५।८।१३ दिवसे सः श्रीराम प्रा, विद्यालय आवश्यकतानुसारं जनसहयोगेन श्रीराम विद्यालयः कक्षाः– ८ (मिडिल स्कूल) रूपेण परिणतः तद्दिन एवो द्वाटितो हरिजन शिक्षाऽभियानोऽपि उत्कट विरोध संघर्ष मुल्लङ्घ्य सफलः संजातः–

अस्य प्रधानाऽध्यापको माधवराज अर्यालः स. शि. नागेन्द्रनाथः– नारायण गौतमश्चैतेषां छात्राऽभिभावकानाञ्च दृढोत्साहेन खिदीम चौमाडायां उपयुक्त विद्यालय भवनं निर्माय मिडिलकक्षाणां निर्वाधाऽध्ययनं प्रवृत्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन् भवन निर्माणे वर्तमान गा. पं. प्रधान पञ्चस्य नारायण प्रसाद, अर्जुन गौतमस्य विशेषोत्साहः सर्वंरगुणुनः— अस्माद्विद्यालयात् अष्टौ कक्षाः समुत्तीर्य बहिर्गता श्छात्राः सप्त्यैव समं हाईस्कूल परीक्षामुत्तर्तुं पक्षमा जायन्ते, इति सुप्रसिद्धिरपि बहु चर्चिताऽसीत् ।

एवं खिदीमे साधारणस्यापि रुचिराध्यापन प्रगति ज्ञात्वा ०१९ वर्षे श्री ५ सर्वकारद्वारा आर्थिक सहायता प्रदान पूर्वकं स्वीकृतः श्री राम विद्यालय मिडिल स्कूलः— अस्य प्रथमः प्र. अ. नारायण गौतमस्त था एकमासान-न्तरं प्र. अ. हेमराज गौतमः संजातः— नागेन्द्र नाथस्तु दीर्घकालीन शिक्षकतया ऽध्यापने संचालने च निर्देशकः कर्मठसाक्षी संभूतः । एवं सर्वेऽपि स्थानीयाः स्वकर्तव्य निष्ठ सत्वात् विद्यालय प्रगतिर्दिनाऽनुदिनं समृद्धि प्राप्ता, यथा त्रिभुवर्षेष्वेव भविष्याऽवश्यकतां ध्यात्वा कार्यवाही संचालिते २०२३।१।३ दिवसेऽनेन श्री ५ सर्वकार द्वारतः— श्रीराम विद्यालय हाईस्कूल इत्यस्थायिनी स्वीकृतिर्लब्धा, अत उल्लास पूर्ण संचालन कार्येण प्रथम वारे २०२५ एस्, एल. सी. परीक्षायां शत प्रतिशत प्रथम श्रेणी परिणतिं प्राप्तवानासीत् ।

इत्थमेकतः वार्षिक एस् एल्. सी. परीक्षाक्रमोऽग्रे प्रसरति चेत्—अन्यतः डा. काशीराज गौतमस्य प्रयासतः श्री गोपालपाण्डे प्रवर्तितायाः प्रवेशिका परीक्षायाः २०२७ केन्द्रीभूय श्रीराम विद्यालय हाईस्कूलः स्थानीयान् दूर प्रदेशीयानपि सप्रयत्न पिपठिषून् परन्तु व्यवहार लग्नतयाऽवसराऽभावेन कुण्ठितान् प्रौढान् प्रवेशिका (एस्. एल्. सी.) परीक्षाया उत्तारयामास, एवं २०२६ वर्ष पर्यन्तेषु सत्र त्रयेषु अर्घाखाँची, गुल्मी, पाल्पा, स्याङ्जा, मुस्ताङादि जनपदानां शतशः प्रौढाः प्रवेशिकासुत्तीर्य विभिन्न क्षेत्र विकाश कार्येषु प्रवृत्ताः स्वकीय जीवन गतिसुधा-राय सक्षमा वर्तन्ते एव ।

अस्य श्रीराम वि. हाईस्कूलस्य प्रथमः प्र. अ. मिडिल कालीनः हेमराज गौतम एव आसीत्, ततः क्रमशः केशवराज नेपालः, यादवनाथ आत्रेयः, केशवराज गौतम श्च प्र. अ. पदमलंकृः, माध्यमिक अंग्रेजी शिक्षक हरि ध्यानी प्रसाद वर्मा, भारत, वाराणसीयः— अन्य विषय शिक्षकाः स्थानीया एव कृष्णदेव, कृष्णचन्द्र मरासिन्यौ— महेन्द्रप्रसादः नागेन्द्रनाथः मुकुन्दराजः—धर्मराज गौतमाश्च, एतेषां सपरिश्रम सेवया सगुणमध्यापनं प्राप्य ०२५-३१ वर्ष पर्यन्तेषु ७ शैक्षिक सत्रेषु शतशो नियमिताः परीक्षार्थिनः एस्. एल्. सी. परीक्षापारङ्गताः— एवं अस्य विद्यालस्यं स्थायि स्वीकरण दिशायां भानुभक्त काशीराज गौतमौ कटिबद्धौ भूत्वा केन्द्रं धावमानौ आशाजनक स्थिति वर्णयन्तौ भौतिक संपन्नतायै संचालित पदावध्यास्ताम् ।

इत्थं खिदीमे श्रीहरिहर सँस्कृत माध्यमिक पाठशाला—श्रीराम विद्यालय हाईस्कूलश्च अस्माकं सामान्य जनजीवनस्य प्रेप्सिताय शान्तिपूर्ण विकाशाय चरमलक्ष्यं साधयन्तौ आध्यात्मिक भौतिक पक्षयोर्द्वन्द्वय समीभूत्वा स्व स्वो पक्रमानुरूपं पूर्ण जागरुकतया संचलनमारेभ समये ।

२०३१ पौष १ गते दिवसात् अद्यावधि नेपाल राष्ट्रिय शिक्षा योजनायाः प्रारंभकाले जिल्ला शिक्षा कार्यालय अर्घाखाँची द्वारा पूर्वोक्त विद्यालय द्वयोः संयुक्तमेकं श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयः खिदीम इति नामकं स्थायीरूपेण स्वीकृतम् ।— एतेन श्रीहरिहर सं. मा. (कक्षाः ८) पाठशालायाः— प्र. अ. नारायण गौतमस्य च समकालमेव पदोन्नतिं कारयित्वा सँस्कृत-साधारणयो रेकः प्रधानाध्यापकः नारायण गौतम एव विनिज्य इत्थं सँस्कृत पूर्व मध्यमा तथा साधारण एस् एल्.सी. परीक्षां साधयमानो विद्यालयः नेपालाधि-राज्ये संभवतः एकमात्रोऽसौ विद्यते ?

अस्य संयोजनाऽनन्तरं पूर्ण सत्रे सँस्कृताऽध्यायिनोऽपि छात्राः अश्रुतपूर्वं अध्ययन शुल्कबाधिताः— परन्तु, अपरस्मात् सत्रादस्माकं विनय लेखनानुसारं श्री ५ सर्वकार अधिराज्यमात्रे संस्कृताध्ययनं (८-१० कक्षा-त्मकं) पूर्ण निःशुल्कं घोषितवान् । २०३३-३४ सत्रतः अस्य विद्यालयस्य सर्वेषां संस्कृताऽध्यायिनां प्रत्येक मासिकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०।- विशमी रूप्यकं हरिहर छात्रवृत्ति रूपेण प्रदातुं सहयोग समिते निर्णयः संजातः—०३६-३७ सत्रात् सा एव वृंद्धि गत्वा प्रतिमासिकं ३० जाता ०३८--३६ सत्रतः परिस्थितिव शादवनत्य प्रतिमासिकं प्रत्येकं १०।- क्रमेणा द्यपर्यन्तमेव वितीर्णाऽस्ते ।—

वर्तमानः शिक्षक--छात्र विवरण इत्थम्:—

संस्कृतपक्षे	पदं	शिक्षक नाम गोत्री	योग्यता	प्रशिक्षणम्
१	प्र०अ०	नारायण अत्रिः	शास्त्री	×
२	स०शि०	दुर्गाप्रसाद "	आचार्य	वी०एड्०
साधारणपक्षे	स०प्र.अ.	मोहन माण्डव्यः	एम्०ए०	वी०एड्०
२	स०शि०	हुमनाथ अत्रिः	आचार्य	×
३	"	महेन्द्र प्रसाद अत्रि	डि०एड्०	डि०एड्०
४	"	अच्युतराज "	डि०एड्०	डि०एड्०
५	"	हरिप्रसाद भारद्वाज	वी०ए०	×
६	"	मणिराज अत्रि	शास्त्री	×
नि०मा०वि० पक्षे	"	मेघराज "	सं० मध्यमा	पू०व्या०
२	"	सावित्री देवी अत्रि	आई०ए०	×
३	"	बलराम "	आई०एस्०सी०	×
प्रा०वि० पक्षे	"	कृष्णचन्द्र धनंजय	सं० मध्यमा	पू०व्या०
२	"	मुकुन्दराज अत्रिः	हाई स्कूल	×
३	"	नागेन्द्रनाथ "	प्रवेशिका	नर्मल
४	"	धर्मराज "	प्रवेशिका	×
५	"	डिल्लीराज "	एम्०एल्०सी०	×
		कर्म चारिणी		
प्र०स०	मुखिया	लोकहरि अत्रि	१० कक्षोत्तीर्ण	×
विद्यालय पाल		पूर्णबहादुर कश्यप,	लेखपठनम्	×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यार्थिन:

सर्वयोग:-५६२

२०४५

कक्षा	१	२	३	४	५	६	७	८		९		१०	
								संस्कृत	सा.	स.	सा.	स.	सा.
छात्र	४५	१७	२३	२९	१२	४८	४२	७	५६	७	४६	१२	३७
छात्रा	२२	१२	६	१६	१७	१९	२५	४	३०	×	११	६	१४
योग:	६७	२९	२९	४५	२९	६७	६७	११	८६	७	५७	१८	५१

अस्य संयुक्त विद्यालयस्य भूमि संपत्ति: कपिलवस्तु जनपदे पारित ५१ विगाहामध्ये सार्ध द्वि २½ विगाहा स्थानीय श्री बाल प्रा. विद्यालयाय नि:शुल्कं प्रदेयं विद्यते पुनश्च रा. शि. योजनापूर्व समय एव श्री ह. सं. मा. पाठशालाया: क्षति पूर्त्यै सं. समिते निर्णयत: काचिदावास योग्या (वास्तु) भूमि विक्रीता आसीत् । परन्तु भय त्रैव राजकोष पारित प्रदानाय शिक्षामन्त्रालयस्य स्वीकृति रपेक्षिता अन्यापि काचिद्भूमि र्निमोच्चत्वादनुत्पादिका इति विक्रयाय प्रस्तुत्य केवल मिदानीं ४२-१०। १४ विगाहा परिमिताया भूमे र्निश्चीत: (ठेक) आय: प्रति वार्षिक रूप्यकं ७६७७५।७८ तथा साधारण कक्षाया: (६-१०) अध्ययन शुल्कं सर्वासां कक्षाणां प्रमाणपत्र, परीक्षा, क्रीडा, पुस्तकालय, निम्नवर्ग छात्र सहयोगकोष, मञ्च, परिचयपत्र, प्रवेश पुन: प्रवेश शुल्कानि एवि कृत्य वार्षिकं ६००००। न्यूनाधिकं संयोज्य विद्यालयस्य संपूर्ण वार्षिकाय:-१३ ६७७५।७८ भवति, इतोपरि सर्वो व्ययभार: श्री ५ सर्वकारो निर्वहति चेत् स्थानीय जनसहयोगेन भवन मञ्च निर्माणो द्वारा: प्रपूर्यन्ते, इत्थं भविष्येपि सुदीर्घसमये सर्वकारस्य स्थानीयानाञ्च अर्थ-परिश्रमौ सदैवाऽपेक्षितौस्त:

राष्ट्रिय शिक्षा योजनया सँस्कृत-साधारणपक्षयो: संयोजन पश्चात् ०३२ विक्रमत: प्राचीन प्रणाल्यनुसारं ०३४ वर्षतश्च नवीन पाठचक्रमानुरूप मनेन विद्यालयेन संमुत्तीर्ण: पूर्व मध्यमा तथा एस. एल. सी. परीक्षा परिणाम: अध: प्रस्तूयते, यथा:-

वर्ष	०३२	३३	३४	३५	३६	३७	३८	३९	४०	४१	४२	४३	४४	४५
प्रतिशतम्	३० %	४१.१८ %	२८.५७ %	४७.६२ %	१८.६० %	३० %	३६.८४ %	१३.७९ %	६० %	१६ ६७ %	३९.४४ %	२५ ४५ %	५१.४३ %	३०.९ %

असौ विद्यालय:- १९९९ विक्रमत: संस्कृत पक्षे ०२५ विक्रमात् साधारण पक्षेकृत्वा सहस्रश २ छात्रान् पूर्व-उत्तर वेद व्याकरण मध्यमा तथा एस, एल. सी. परीक्षां उत्तरायन् उच्चशिक्षाऽधिकारिणोऽपि कार्यित्वा शिक्षा विकाश द्वारत एव देशस्य शान्तिपूर्ण विकाशं कामयमानस्य श्री ५ महाराजाधिराजस्य सदिच्छा कार्ये दीर्घकालीन सूक्ष्म सहयोगं प्रापयेन् वर्तते । अस्य १९६४-०२१ कालीना उत्थिति: काष्ठमाण्डपं विना प्राय अधिराज्यस्यैव तुलनायां समुन्नता आसीदिति वर्तमान संस्कृत शिक्षित नेपाली समुदायस्य २५% प्रतिशत: समाज एव प्रमाणाऽधारोऽस्ति ।

वर्तमानस्य श्री हरिहर सस्कृत तथा साधारण माध्यमिक विद्यालयस्य प्राक्कालीना १९८१-१९९३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थितिः संस्कृत सामान्य शिक्षां (प्रारंम्भिकों) वितरत्यभूत्-मध्यकालीना १९९४–०२१) समूल शाखा प्रशाखात्मिका उपस्थितिः- वेद, व्याकरण, दर्शन, ज्यौतिष, साहित्य विषयेषु (द्वादशकक्षात्मिकां) प्रामाणिक संपूर्ण मध्यमा शिक्षां वितारयतिस्म आधुनिककालीना (२०२२-०३१) परिस्थितिः संस्कृत प्रथमा (कक्षाः–८) परीक्षामुत्तारयन्ती कथमपि संजीविताऽसीत्, तथा अत्याधुनिक सामयिकया, ०३१ पीपतः संयुक्तया परिपाट्याऽद्यपर्यन्तमेव संस्कृत पूर्व मध्यमा (एस. एल्. सी) शिक्षाद्वयी प्रकाश्यते, एवं पातोत्पाता माहात्मनामिति न्याय सूत्रानुसारं नूनारं प्रकृति नियमैरेव महत्त्व शालिनामुत्थान पतनं स्वाभाविकम् ।

अत एवाऽस्माद्विद्यालयात् पुनः संस्कृत संपूर्ण मध्यमां प्रमाणपत्र संमितां (मानविकीञ्च कक्षानुसारं प्राचीन गुणस्तरीयताऽधारे नव विकाशीकरणस्य वृद्धयं श्री५ सर्वकाराधिगृहीतां पूर्वोक्त १७ विगाहा भूमि प्रत्यादाय वर्तमान ५१ विगाहा संकालितायिक पृष्ठ भूमौ अत्रैव मूलस्थितौ खिदीम स्थल्यां श्रीहरिहर संस्कृत तथा साधारण उच्च माध्यमिक विद्यालय नाम्ना संपादयितुं सर्वेषां सम्बन्धिताऽधिकारिवर्गाणां विदुषाञ्च पुण्य विचारः संवान्छनीयोऽस्ति ।

इत्थं १९८१ विक्रमतः- २०४४ पर्यन्तेषु ६४ वर्षेषु अस्य हरिहर संस्कृत विद्यालयस्य निम्नोक्ता परिस्थिति प्रत्यक्षं अनुभूयमानस्य क ख ग इत्यारभ्य शास्त्री पर्यन्तं पठित्वा राजस्वीकृत (२०२२) समयात् प्रधानाध्यापकोऽवच्छिन्नं प्र. अ. पदेनेवकस्य नारायण गौतमस्य दृष्ट-श्रुत--कृत सत्यानुभवोऽयं सर्वोभिलेखः स्वर्गीय श्रीमहापण्डित हरिराम महामिश्रि सकाशात्प्रेरितस्य श्री हरिहर गौतमस्या क्षय्योदारतायाः प्रकाशो विद्यते, इति,

संकलनकर्ता
नारायण गौतम्

क्षणे क्षणे यन्नवतामुपैति तदेवरूपं रमणीयतायाः

माघः शिशुपाल वधम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथम दिने सुवर्ण जयन्ती समारोह कार्यक्रमः

उद्घोषकः— महेन्द्र गौतम

अद्य २८।८।०४४ दिवसे श्री ह. सं. सा. मा. विद्यालयस्य पञ्चाशद्वार्षिकी सुवर्ण जयन्ती, समारोहः जि. शि. स. अधिकारी, भक्तमान् कार्की एवं अतिथि प्रा. राजाराम सुवेदी तथा स्थानीय परिवेश पंचायत प्रतिनिधयः प्रहरिवर्गाः एवं स्थानीय श्री ५ सर्वकार निकाय प्रतिनिधयो बुद्धिजीविनः शिक्षाप्रेमिणो भद्र पुरुष नारी वर्ग सहित स्थानीय दर्शक वृन्दोपस्थितौ निम्नकार्यक्रमानुसारं भव्य रूपेण संपन्नः

क्रमोयथाः-

१) दशवादन समये प्राङ्गणस्थित दुर्गामन्दिरे विद्यालयश्चिरकालं गुणकारी शिक्षां वितरन्सञ्चलतु इति कामनया वैदिक विधानेन श्रीसरस्वती पूजा प्रार्थना

२) एकादश वादने, विद्यालय सं. समितेरध्यक्षस्य एवं स्थानीय प्रधान पंचस्य श्रीनारायणप्रसाद गौतमसभापतित्वेध्वताकोत्तोलनम्- सर्वैःसमुत्थाय वैदिक नेपाली राष्ट्रिय गानम्-करतलध्वनिपूर्वको श्री ५ राजा प्रभुवो जयघोषः

३) श्री सरस्वती, श्री पाणिनि महर्षिः, श्री ५ महाराजाधिराज, श्री ५ महाराज्ञी, श्री गुरू पं. दधिराम मरासिनी, विद्यालय संस्थापक श्री हरिहर गौतमस्य च प्रतिमूर्तौ सिन्दूर माल्यार्पणम्

४) प्रमुखातिथि श्री जि. शि.स. अधिकारी करकमलतः सुवर्ण जयन्ती समारोहोद्घाटनम्

५) प्र. अ. द्वारा पट्टिका विभूषणप्रदानम्

६) स प्र. अ. मोहन ज्ञवलीद्वारा स्वागत भाषणम् :—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७) अतिथि प्राध्यापक श्रीराजाराम सुवेदीत: सँस्कृत महत्व विपये मर्मस्पर्शी संभापणम्

८) भूतपूर्व विद्यार्थीभ्य: तात्कालिक स्वानुभव विज्ञापन क्रमे
१) मीनराज पौड्याल नुवाकोट, २) वामदेव मरासिनि ३) हेमनाथ चुदाली ४) जगन्नाथ भट्टराई ५) वेणीमाधव अधिकारी ६) तोयनाथ ज्ञवाली ७) नेत्रप्रसाद गौतम ८) जगन्नाथ पौडेल ९. स्थानेश्वर पौडेल पडेना च स्वस्वानु भवं प्रकटी कृतवन्त:

द्वितीय दिने सुवर्ण जयन्ती समारोह कार्यक्रम:

उद्घापक:- महेन्द्र गौतम

अद्य २९।८।०४४ दिवसे श्री विद्यालयस्य सुवर्णजयन्ती समारोहस्य द्वितीय द्विवसीय कार्यक्रमे वि. सं.स. अध्यक्षस्य एवं स्था गा. पं. प्र. पंचस्य श्री नारायण प्रसाद गौतम्स्याध्यक्षतायां निम्न कार्यक्रमा: संपन्ना:—



१) सभागठनं, वैदिक लौकिक राष्ट्रिय गानं श्री सरस्वती, पाणिनि:, श्री ५ महाराजाधिराज एवं श्री ५ महाराज्ञी पं. दधिराम गुरु हरिहर शिष्यस्य च प्रतिमूर्तौ सवैदिक मङ्गल ध्वनिकं पुष्पमाल्यार्पणम् ।

२) साहित्यिक गोष्ठी:— साहित्यिक भूमिका निवन्धक:- मोहन ज्ञवाली

३) विद्यालयस्यैतिहासिक प्रगतिप्रतिवेदक:- नारायण गौतम

४) जलपानम्

५) सायं ९-१२ बादने सांस्कृतिक कार्यक्रम प्रदर्शनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीय दिने सुवर्ण जयन्ती समारोह कार्यक्रमः

उद्घोषकः— महेन्द्र गौतम

१।९।०४४ अद्य श्री ५ महेन्द्र जयन्ती एवं संविधान दिवस स्तथा विद्यालय सुवर्णजयन्ती समारोहस्य तृतीयान्तिम दिवसस्य, क्रियाकलापाः निम्न विवरणानुसारं पञ्चवाद्य पुरः सरं भव्यरूपेण संपन्नाः

१) पंचवाद्य-पताका–राजप्रतिमूर्ति वैदिक लौकिक जय ध्वनि सहितम् प्रभात भ्रमणम् ।

२) सभागठनम्, पताकोत्तोलन पूर्वकं वैदिक लौकिक राष्ट्रिय गानम् ।

३) श्री ५ महाराजाधिराज श्री ५ महाराज्ञी एव स्वर्गीय श्री ५ महेन्द्र प्रति मूर्तिपु माल्यार्पणम् एवं श्री ५ महेन्द्र एवं नेपाल सविधान विषये विभिन्नाः प्रवचनाः

४) विद्यालयीय वार्षिक परीक्षा परीक्षा परिणाम् । प्रकाशनम्

सुवर्ण जयन्ती कार्यक्रमः

१) पुरातन नवीनाध्यापक विद्यार्थिना परिचयपूर्वकः पुनर्मिलन समारोहः

२) अस्य विद्यालयस्य संस्कृताध्ययन विषयको गम्भीरः प्रसङ्गः–

श्रीहरिप्रसादाचार्यः (प्रा श्री म. सं वि. वि. दाङ्ग

३) अस्य तात्कालीनाऽद्यतन व्यवस्थाविषयिकीतुलनाः–

श्री मणिभद्र शर्मा प्र. स. श्री म सं. वि. वि. दाङ्गः

४) अस्य वर्तमान व्यवस्था पृष्ठभूमी भविष्य संभाव्यताः–

दण्डपाणी मरासिनि, वामरूक, अ. खा.

५) क्रीडा प्रतियोगिता (प्राचीनार्वाचीन विद्यार्थी शिक्षकेपु ।

पुरस्कार वितरणं–प्रीती भोजनपूर्वक उपसंहारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्त गुरुः श्री पं. टंकनाथ पराजुली, व्याकरणाचार्यः

अस्य जीवनवृत्तम्

१६७१ विक्रम संवत्सरे कास्की पोखरा मिरुवा ग्रामे पं. चन्द्रकान्त पराजुली द्रोपदी देव्योः कुक्षौ टङ्कनाथ पराजुलि शर्मणो जन्माऽभूत् ।

पितुरेव कृत लिपिप्रवेशः कौमारे गुरुवर्याच्छिवकुमार रेग्मी शर्मणः सकाशाद्गृह एव व्याकरणसंम्पूर्ण मध्यमा परीक्षा विषयकान् ग्रन्थान धित्य काशीतः परीक्षामुत्तीर्णः । पश्चात् तत्रैव मारवाडी सस्कृत कलेजं (विद्यापीठ) प्रविश्य नव्य व्याकरणाचार्य परीक्षायां १९६४ वि. वर्षे प्रथम श्रेण्यां समुत्तीर्णः ।

१६६६ वि. वर्षतः श्रीहरिहर सँस्कृत पाठशालायां सन्नियुक्तः सिद्धान्त-गुरु नाम्ना चर्चितः ।

२००४ वि. वर्षतः श्री विन्ध्येश्वरी संस्कृत विद्यालये पोखरायामध्यापनकार्यं समाप्य सर्वकार निवृत्त भरण भूपितन हुँइदानौं त जनपदकोणे देवघट्ट तीर्थे निवसन् विधुरः शान्तः शान्तः सत्सङ्गतिप्रियः समय व्यत्ययति ।

संपादकः

श्री हरिहर संस्कृत पाठशाला खिदीमः १६८१ विक्रम विक्रम संवत्सरे प्रतिष्ठिता त्रिकोण रूपेण संचालिताऽसीत्, १९९४ वि. वर्षत स्त्रिकोणमेकीकृत्य वाराणसी गभर्नमेंट संस्कृत विद्यापीठे (कलेजेन) सह सवध्य संपूर्ण मध्यमा परीक्षा ग्रन्थाध्यापिका संजाता, तत्क्रमएवाऽहमपि १६६६ वि वर्षतो नियुक्तो वेद–व्याकरण साहित्य विषयेषु संपूर्ण मध्यमा (प्रमाण पत्र) स्तर परीक्षायां छात्रानुत्तारयितुं सफल प्रयास आसम्, तस्या पाठशालाया अद्यतन नाम कर्म च श्री हरिहर सं. तथा सा. मा. वि. इति स्थिरीकृतयो भयदृष्टिजाँत इति हर्षावसरः- अतोऽस्य उत्तरोत्तर वृद्धि (पुनः प्रमाणपत्रान्तं, शुभं कामये इति

टंकनाथ पराजुली

नव्य व्याकरणचार्यः–

व्याकरण सहाध्यापकः श्री पं. रक्षानाथपौड्यालः

असो गुरुः खिदीम सल्लेनाग्रामे आत्रेयकुले १६६६ वि. संवत्सरे जातः, गौतम कुलगुरू पुरोहितत्वेन किंचित्पठितात्स्वपितुः सकासादेव प्रारंभिक शिक्षां गृहीत्वा श्री पं. दधिरामगुरोः संगत्या विशेष शास्त्रीय ज्ञानाय जागरुकः, सः रिडी संस्कृत पाठशालां कास्कीपोखरा शिवकुमार रेग्मीं गुरूं चोपेत्य लघुकौमुद्यमरकोषहितोपदेशादीनधीन्य रानीपोखरी राजकीय संस्कृत पाठशालायां तीनधाराछात्राऽवासी भूत्वा सिद्धान्त व्याकरण तदनुकूलाश्चग्रन्थान्समाप्य १९८५ वि. वर्षे वाराणसेय गभर्नमेंट संस्कृत कलेजतः संपूर्ण मध्यमा परीक्षायां समुत्तीर्णः– तत्पश्चाद्ग्रामेष्वेव पौराणिक प्रसिद्धमापन्नः, १६९० वि. वर्षतः श्री हरिहर प्रारंभिक पाठशालायां खिदीम हर्रावोट ग्रामे नियुक्तो ग्रामीणान् वटन् सम्यगध्यापयन् १९९४ वि. वर्षे श्री हरिहर संस्कृत पाठशालायां पोखराथोक एव व्याकरणाध्यापकत्वे नियुक्तः– पौराणिक वैशिष्ट्येन समयाऽभावभूतः १९९८ वि. वर्षे स्वयं याचिताऽवकाशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रान्तान्तरेष्वपि प्रशिद्ध पौराणिकः संजातः । तस्य वाचन श्रवणाय दूर सुदूरतोऽपि जनाः संगठन्ति, परस्मिन्नपर-स्मिन्वर्षनिमित्तेऽपि पुराणवाचन निमन्त्रणाः पंक्ति बद्धा आगच्छन्तिस्म । एवं बहुसमयं व्यतीत्य वार्धक्येनापि किंचिदुद्विग्नः, २०।२२।१२।१४ गते श्रीपश्चराजस्वीकृत पुररुद्धाटितायां श्री हरिहर संस्कृत माध्यमिक पाठशालायां पोखराथोके व्याकरण सहाध्यापक पदे नियुक्तः । २०३१।६।१६ दिवसे नवीन शिक्षायोजना स्थिरीकृते श्री हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालयेऽपि नियुक्तिपत्राऽभिलिखितः सः पूर्वस्मिन् दिन एव दिवं जगाम, इति ।

सपादक

व्याकरण सहाध्यापकः मध्य (गुरुः) पं. घनश्याम पौड्यालः

सक्षिप्ता जीवनी

अर्घाखांची जनपदे खिदीम हर्रावोट ग्रामे शोभाकर सत्यकला गर्भतः वि. सं. १९६१ ज्येष्ठ शुक्ल तृतीयायांजातः– वि. सं. १९६९ चैत्र शुल्क दशम्यां व्रतबन्धेन सँस्कृतः श्री पं. दधिराम (खिदीम पोखरांथोक) गुरो रूद्रीं समाप्य रिडी सँस्कृत पाठशालायां ढुण्डीराज पंथी गुरोर्वेदं–प्रारंभिक व्याकरणं काठमाण्डू रानी पोखरी सं. पाठशालायां सिद्धान्त व्याकरणं चाधीत्य काशी गभर्नमेंट सँस्कृत कलेजतः संपूर्ण मध्यमा परीक्षामुत्तीर्णः अ. खा. कुर ग्रामे सनुर्ज्योतिपीतः, जि. पर्वत पाङ खर्कोट ग्रामे मोतीलालाचार्यतश्च ज्योतिषाध्ययनं कृत्वा पञ्चाङ्ग गणनापर्यन्तं क्षमतामग्रहीत् । जीवन प्रथमचरणे ब्रह्मचर्यं साधयित्वा द्वितीय चरणेऽपि तथैव वस्तु कृत निश्चयः सः श्री पं. दधिराम गुरोः प्रेरणया १९८७ वि. संवत्सरे गुरो रग्रज खगेश्वर मरासिनि पुत्र्या बालिका देव्या सह विवाहितः । राजकीयाऽयुर्वेदौषधालये-तान्सेन नगरे स्वाग्रजस्य शालिग्राम कविराजस्य सहायको वैद्यः संजातः,

वि. सं. १९८५ समये श्री हरिहर पूर्व कालिक,– मालिका पाठशालायां १९८९ कल्पे श्रीहरिहर प्राक्कालीन पोखराथोक पाठशालायां १९९४ संवत्सरतः पोखराथोक एव श्रीहरिहर संस्कृत पाठशालायां भारत गभर्नमेंट संपृक्तायां अध्यापयन् सरल सहनशील- कर्मठ व्यक्तित्वेनानवरत साधनाकारणेन च मध्यकोमुद्यामसाधारण प्रतिभासंपन्नः सहस्रशो विद्यार्थिनः प्रतिभावयन् मध्यगुरु रिति प्रसिद्धो ज्योतिषा-युर्वेद सेवया ग्रामीणानुपकर्वन् विद्वत्प्रियो जनप्रियश्चासीत् । पुराणवाचने धार्मिक क्रियायां च रुचिं दधानोनित्य प्रातर्होरात्रयं सायं होरैक समयं स्नान संध्या–पंचायतनपूजा –बलिवैश्वदेव–पितृतर्पण योगाऽभ्यास प्राणायामैर्यापयम् राजनीतावपि रुचिं स्थापयतिस्म ।

मोदनाथ प्रश्रित, हरिप्रसादोपाध्याय, जयप्रकाश किसान, वेदमाया, ममतादीन् संतत्य श्रीहरिहर संस्कृत पाठशाला सेवन क्रमे २०११ चैत्र शुल्क द्वादश्यां ससारतस्तिरो भूय दिवङ्गतः–

इति, मोदनाथ प्रश्रितः–अनुवादकः संपादकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याकरण सहाध्यापक· श्रीरामजीप्रसाद गौतमः

असौगुरुः स्वधर्मनिष्ट तुलसीप्रसाद गौतम मध्यम पुत्ररूपेण १९७२ विक्रमवत्सरे खिदीम पोखराथोक ग्रामेऽजनिष्ट । श्री पं. दधिराम गुरुणा धार्मिकाऽध्यात्मिक विमर्शशीलेन पित्रा गृह एव प्रशिक्षमाणः संस्कार वर्द्धितोऽपि कैशोरेवयसि श्रीपं. दधिराम गुरु– रिडी सँस्कृत पाठशाला द्वारतः श्री राजकीय सँस्कृत रानीपोखरी पाठशालायां पठन् त्रिधारा छात्राऽवास निवासी सः १९९२ वर्षे वाराणसेय गभर्नमेंट संस्कृत कलेजतो व्याकरण संपूर्णमध्यमापरीक्षामुत्ततार । १९९४ विक्रमवर्षे श्रीहरिहर संस्कृत पाठशालायां नियुक्तो विशेपज्ञ रूपेण दिवा-नक्तं व्याकरणाऽध्यापनं कुर्वन् स्वयं पातञ्जलमहाभाष्य ग्रन्थान्समभ्यसत्, तस्य विद्यार्थिनो विद्याचञ्चवो भवतिस्म

ततोऽपि शिक्षा विशेपज्ञो भवितुं १९९९ वर्षे हरिहर सं. पाठशालातो गृहीताऽवकाशो नेपाल राज-कीयाऽधारशिक्षा प्रशिक्षणं गृहीतवान्, तस्मान्निष्णातः क्रमेण जनपद शिक्षा निरीक्षकः अञ्चल शिक्षा निरीक्ष-कश्च भूत्वा निवृत्त भरणमादायेदानीं स्वतन्त्रो गृह्व्यवहारजातं पश्यन् धार्मिकाऽध्यात्मिक सनातनग्रन्थानभ्यसमानो रूपन्देही जनपद अमवा ग्रामे सन्तुष्टो निवसति, मयालघुकौमुदी गुणस्तरेणै तस्मादेव पठिता, मदीयः पितृव्यो गुरुश्चभूतः संमाननीय सःमां विशेपतः स्निह्यति ।

संपादकः

ज्योतिष सहाध्यापकः श्री पं. दिवाकर ठाकुरः (मैथिलीगुरुः)

असौ गुरुः १९९७ विक्रम वर्षे वर्दिया वन्धुश्रीस्थानान्तरितायां हरिहर सँस्कृत पाठशालायां हरिहर महा यज्ञा वसरे दीर्घत्रिपुण्ड्रभस्मभालः उष्णीशवद्ध शिरः -रुद्राक्षमाला गलो लम्व धौतकच्छुकैश्च भव्यरूपो गुरुभिः सहदेववाण्या आलापं कुर्वन् सहसा प्राप्तः– वार्ताऽवसाने ज्यौतिषाचार्य योग्यतया तस्यां पाठशालायां ज्यौतिषाध्यापनाय निवेदितो हरिहरस्तं नियुञ्जन् दश विद्यार्थिनस्तस्मै समर्पितवान्-पश्चात् स्वस्थानं खिदीममेव प्रस्थापितायाः पाठशालायां शछात्राऽवास एव कृतनिवासः स ज्यौतिपं पाठयितुं प्रावर्तत ।

नित्यं स्नान सन्ध्या पूजाक्रमे नूतन मृल्लिङ्गं निर्माय विशेष शिवपूजनं रूद्रीपाठंच करोतिस्म–व्याकरणा-ध्यायिन शछात्रानपि मृदु सस्कृत भाषया शिक्षन्, अक्षरलेखनशैली दृष्टया मां शिवकवचं लेखयित्वा प्रति प्रातः पाठं, कपोल डमरू वादन ञ्चाकार्षीत, पश्च पणमासान ध्याप्य रूग्णत्वेन गृह् गत । अस्माकं दौर्भाग्येन नातिदीर्घ समये दिवङ्गत इति श्रुतम् । तस्य प्रतिच्छायां चित्रमूर्ति वाऽन्यद्विवरणं किमपिन प्राप्यते ।

संपादकः–

शुल्क यजुर्वेद सहाध्यापक श्री पं यदुनाथ अर्घालः

गुल्मेलीराज्ञो गुरुकुले १९५२ विक्रम वत्सरे जातः श्रीगुरुः स्वकीय वृद्धश्वशुरस्य श्री सु. हिरण्यलाल गौतमस्य सत्प्रेरणयाऽभिभावकत्वे च नेपाल राजकीय रानीपोखरी संस्कृत पाठशालायां स्वगुरोः पद्मलोचन शर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सकासात्, श्री शुल्क यजुर्वेद संहिता विशुद्ध स्वर शैली सहितां कण्ठसादधीतवान्, पश्चाद् गृहमुपविष्टोपि यजमान यज्ञेषु गृहेच नित्यं वेदपाठी आसीत् ।

१९९४ मार्गशुल्क पंचमीत: श्रीहरिहर संस्कृत पाठशालायां वेदाध्यापकत्वे नियुक्तोऽस्मान् पंचपाठी सहपाठिन एक स्वरशैल्या पाठयन् अदृष्ट कोष्ठेऽपि विस्वर पठन त्रुटि प्रगृह्णातिस्म, मौन यष्टया कृतप्रश्नाश्चवयं स्वमुख हस्तोत्तरंदद्म: ।

नित्यं स्नानसंध्या पञ्चायतन देवपूजन वलिवैश्वदेव पितृतर्पण वेदपाठ मानस रामायण पारणश्च स्वसमय मतिवाहयन् परमोदारो दयालु: सरलस्वभावश्चासीत, दिवा विश्रामेऽस्मान् स्थानीय क्रीडनर्वविनोदयन् वेदाक्षर लेखन शैलीञ्चाऽशिक्षयत्, मदृशानवेदाधीतश्छात्रान् वेद एव मध्यमापरीक्षां पूर्व मीमांसा शास्त्री परीक्षां च पूरयितुं सफल प्रेरणो गुरू: २०१२ विक्रम वर्षे त्रीन् पौत्रान् विहाय रिढी गण्डकीं गन्तुं बन्धूनाहूय तुलसीमठे मानस रामायणं पठन् दिवङ्गत:

संपादक:

श्री धनन्जय मरासिनीको संक्षिप्त जीवनी

लुम्बिनी अञ्चल अर्घाखाची खिदीममा जम्मनु भएका श्री धनन्जय मरासिनीको जन्म १९७५ साल वैशाखमा भएको थियो । वहाँका पिता श्री दधिराम मरासिनी र माता गंगा देवी हुनुहुन्छ वहाँकी विमातृ माता गोपिका देवी पनि हुनुहुन्छ । आफ्ना माता पिताका एक मात्र सुपुत्र श्री धनञ्जयज्यूको प्रारम्भिक अध्ययन आफ्नै पितावाट घरमै भएको थियो । पछि १९८४ सालमा पिताको साथमा १ वर्ष वनारस मङ्गला देवी सस्कृत विद्यालयमा अध्ययन गर्नुभयो । १ वर्ष पछि घरमै फर्किनु भयो र त्यहाँ केशवराज मरासिनीज्यूसंग संस्कृत व्याकरणको अध्ययन शुरू गर्नुभयो । २ वर्षको गहन अध्ययन पछि परीक्षाको शिलशिलामा १९८८ साल देखि रानी पोखरी संस्कृत पाठशाला काठमाण्डौं पुग्नु भयो र त्यहाँ मोदनाथ, कालिदास आदि गुरुहरूसंगवाट प्रथमा परीक्षा कोर्स १ वर्ष अध्ययन गर्नुभयो । स्वास्थ्यको कारण कार्टमाडौं वस्न नसकी घरमा फर्कनु भयो र श्री टीकाराम मरासिनीज्यूसग काव्य, नव्य व्याकरण आदिको अध्ययन थाल्नु भयो यसै समयमा १९९२ साल जेष्ठमा १७ वर्षको उमेरमा पाल्पा देउराली निवासी देवकुमारी देवीसंग शुभ विवाह भयो । १९९२ साल कार्तिकमा अध्ययनको क्रममा पोखरा पुग्नु भयो र विन्ध्यवासिनी संस्कृत पाठशालामा शिवकुमार गुरुज्यूसंग मध्यमाको कोर्ष २ वर्ष अध्ययन गरी पुन: भर्खर खुलेको हरिहर संस्कृत विद्यालय खिदीममा टङ्कनाथ गुरुसंगवाट अध्ययन पुरा गर्नु भयो ।

१९९९ सालमा श्री हरिहर सँस्कृत पाठशालामा अध्यापन शुरू गर्नु भयो र २०२१ साल सम्म उक्त विद्यालयमा २२ वर्ष अध्ययन गर्नु भयो सो क्रममा २०११ सालदेखि २०२२ सालसम्म प्रधानाध्यापकको कार्य समाल्नु भएको थियो भने वहाँको सम्पूर्ण कार्य सो विद्यालयवाट करीव ६००० विद्यार्लीले अध्ययन गरेका थिए । र करीव २७०० विद्यार्थी उत्तीर्ण भएका थिये । २०२१ सालमा उक्त विद्यालयको विस्थापनापछि पुन: हरिहर संस्कृत विद्यालयमा २०२२ साल देखि २०३१ साल सम्म अध्यापन गर्नु भयो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यसरी ३२ वर्षको लामो अध्यापन पछि तीर्थवासको इच्छा पूरा गर्न हाल नारायणी गण्डकीको पुण्यक्षेत्र गैंडाकोटमा हुनुहुन्छ । सनातन धर्मावलम्वी श्री गुरुज्यूको धेरै समय पूजा पाठ ध्यान मनन कीर्तन सत्संगतमा व्यतीत हुन्छ । आफ्नो गहन अध्ययन र लामो अध्ययनको अनुभव संगालेर धार्मिक साहित्य सेवा समेत् गर्दै हुनुहुन्छ हाल सम्म निम्न कविता काव्य, लेख पूरा भैसकेका छन् तर आजसम्म अप्रकाशित अवस्थामै छन् ।

१) राम चरित्र– नेपाली भाषात्मक छन्द काव्य
२) रामकथा पियूर्ष— संस्कृत भाषात्मक पद्य काव्य
३) सत्याम्मृतम् — गद्यात्मकलेखसंग्रह
४) क्षोभ समाधानम् – पद्यात्मक कविता संग्रह
५) कृष्णलीला मञ्जरी – सप्त सर्ग संस्कृत काव्यम्
६) श्रीराम कथा पियूषम सप्त सर्ग संस्कृत काव्यम्
७) श्री कृष्णलीला चिन्तनम् संस्कृत पद्यात्मक रचना
८) फुटकर रचना (संस्कृतमा)

क) विनयष्टोत्तर शतकम् ख) कृपाभिलासा शतकम् ग) गंगास्तोत्रम् घ) रक्षाष्टकम् ङ) शरणाष्टकम् च) दासाष्टकम् छ) गण्डकीस्तोत्रम्

(संग्रह) नीलकण्ठ

संस्कृतम् तथा संस्कृति ।

पं· धनन्जय मरासिनी

शुण्डेनानारससुमधुरंमोदकंतच्चतुर्भि
र्दोभिर्युक्तः शिरसिमुकुटेनाऽपिरक्ताम्लरेण । ।
दिव्यैर्माल्यैश्चरणयुगयोर्नूपुराभ्यांचसौम्यो
विघ्नध्वान्तंहरतिरविवत्पातुयोविघ्नराजः । । ।१।
वयमद्यकुतोगता इति नहिजानीम इतस्ततः स्थिताः । ।
ननुसंस्कृतपद्धतिस्तथागलिता सँस्कृतिपद्धतिः पुनः ।२।
अपिभौतिक सौख्यसम्पदं किलविज्ञानसुदर्शितांप्रति
अतिमुग्धतयाऽवलोक्यतु मदमत्ताइव मार्ग वर्जिताः ।३।
सहसा गमनाय तत्परा नत येषामवधिर्न विद्यते ।।
अनुकृत्यविभिन्नसभ्यतामनुपाश्चात्यसुसभ्यतामपि ।४।
शिथिलीविहिताऽऽर्यसंस्कृतिर्नतथासंस्कृतमेव चादृतम् । ।
उभयोःसरणिस्तुपूर्वजैरतियत्नेनसमर्जिताकिल ।५।
वयमद्यतिलाञ्जलिमुदा खलुतस्यै प्रतिदातुमुद्यताः । ।
अनिवार्य तयास्थितान्यपि सकलाविष्करणानियानितु ।६।
सुखदानी निरन्तरं नहि परमार्थस्यदृशामृषा नकिम् । ।
परमार्थसुसाधनायचपठितव्यं सततं सुसंस्कृतम् ।७।
इहलौकिकसौख्यसाधनंपठितव्यंचकिलाऽऽङ्ग्लविद्यकम् । ।
प्रथमे वयसि स्थितान् शिशून् प्रथमं सँस्कृतपाठनंवरम् ।८।
सहतेन गुरोः सकाशतः सततंसंस्कृतिबोधनं तथा । ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदनन्तरमेव पाठनं प्रभवेदाङ्ग्लसुशास्त्रकस्यच ।९।
पठनंयदि संस्कृतस्यच पठनं नाङ्ग्लसुविद्यकस्यतु ॥
ननुभौतिक सौख्यसाधनाद्रहितोऽस्त्येवसदानरः पुनः ।१०।
यदि चाङ्ग्लसुभाषकं पठेत्सततसंस्कृतशास्त्रवर्जितम् ॥
सचमूकतरोभवेन्नकिं परमार्थस्यविचारणायच ।११।
इतिवुद्धिविमर्शनेनहि खिदीमग्रामनिवासिनोनराः ॥
पठनंसममेवकुर्वतेद्युभयोरेव सुशास्त्रयोःपुनः ।१२।
पश्चाशद्वर्षपूर्णेसतिचविहिता स्वर्णपूर्वाजयन्ती
सानन्दं भूतपूर्वैं र्गुरुभिरथतैः स्नातकैस्तत्रमार्गे ॥
एवंनेपालदेशेनिखिल नगरष्वेवसर्वाश्चलेषु
ग्रामेविद्यालयेवाऽध्ययनसरणिःस्यात्तथैव प्रसस्ता ।१३।
खिदिमस्थसुवुद्धिजीविभिर्विहितापाठनपद्धतिस्त्वियम् ॥
सकलाअपिमानवाः सदाहृचनुकृत्यै सततं यतन्तु च ।१४।

पाश्चात्यानामनुकरणतः पूर्वजैरर्जितंय
ल्लुप्तप्रायं समभवदिदंयत्सदा चारमार्गम् ॥
तस्योत्थानेनिखिलसुजनैः संस्कृतेः संस्कृतस्य
ज्ञानंदेयंनिजपृथुक वर्गाय यत्नेन सम्यक् ।१५।

निजसंस्कृतिरक्षणंतथापठितव्यंचसुसंस्कृतस्यच ॥
अभिभावक पूरुषाश्चतान्स्वशिशूंस्तत्रसुयोजयन्तुच ।१६।
खिदिमस्थसुपाठ्यगेहवदितरत्राऽपिभवन्तुतादृशाः ॥
उभयोर्द्वयशास्त्रयोः सदापठनंपाठनमेवयत्रच ।१७।
सकलेष्वपिछात्रकेपुचखलु छात्राप्वभिभावकेपुच ॥
सुमहत्वमशेषवोधनमुभयोः संस्कृतकस्यसंस्कृतेः ।१८।
स्वकसंस्कृतिरक्षणायतुकिलनेपालसुसर्वकारकाः ॥
अनुसंस्कृतपाठनायवैसततं तत्परका भवन्तुच ।१९।
खलुसंस्कृतपाठ्यपुस्तकानपिनिर्धारितकान्विधायच ॥
निखिलेष्वपिपाठनायचाऽखिलविद्याभवनेपुदीयताम् ।२०।
ननुभौतिकसाधनंसदाहृयुपयुक्तंचसुरोचकंपुनः ॥
अनुसंग्रहणोत्सुकोनरोभवितातस्यखलुस्वभावतः ।२१।
किलसंस्कृतशास्त्रकंविनाननुनग्नोभविता स भौतिकः ॥
जननोनिखिलस्यसंस्कृतमपिभाषासमुदायकस्यवै ।२२।
इतिसर्वजनावदन्तिचननुवैज्ञानिकवुद्धिसम्मतम् ॥
जगतीं परिचेतुमेवकोऽपरिचित्यैवतुमातरं क्षमः ।२३।
अतएवगुरोः सकाशतः पठनायं प्रथमंतु संस्कृतम् ॥
युत एपनरोऽपिमेधया तत आध्यात्मिकवोधवान्भवेत् ।२४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत आङ्ग्लसुभाषयासह पठनंसंस्कृतशास्त्रकस्यंच ॥
उभयोः पठनात्तु भौतिकसुखवाश्चात्मसुखेनमोदितः ।२५।
भवितासकलस्यसन्ततिरितिसर्वेप्रयतन्तुमानवाः ॥
अपिसंस्कृतिसँस्कृताख्ययोः सरणिंक्षेमकरांवदन्तिहि ।२६।
वयमद्धतिलाञ्जलिकथंदततस्यैप्रतिदातुमुद्यताः ॥

शान्तिक्षेत्रंयदितुकरणे स्वस्यदेशस्यवाञ्छा
स्याच्चेत्सत्यंकुरुतयठनंसँस्कृतस्यैवमादौ ॥
सार्धंकृत्वामुजननिवहैः सँस्कृतेश्चापिरक्षां
शान्तिक्षेत्रंभवतिसुदृढंस्वीयदेशंप्रसस्तम् ।२७।
अहोभाग्यमहोभाग्यं नेपालस्थजनस्यतु ॥
य इच्छतिसदाचाङ्ग्लभाषयासहसँस्कृतम् ।२८।
सँस्कृतेःपालनायैवतत्परोयोनिरन्तरम् ॥
अध्यात्ममार्गमालम्ब्य सुखमाप्नोतिनिश्चयम् ।२९।
लाभस्तेषांजयस्तेषांकुतस्तेषां पराजयः
येषामिन्दीवरश्यामोहृदयस्थोजनार्दनः ।३०।

धनञ्जय मरासिनी

भूमिदात्री(हरिहरमाता) श्री योगकुमारी गौतमी

इयं कस्यकुले कदा जातेति नज्ञायते परं खिदीम पोखराथोकस्थित श्री सुब्बा तारानाथ गौतमस्य द्वितीया सहधर्मिणी श्रीहरिहरस्य सपत्नमाताऽथीराऽसीत् । अस्या नामनि कपिलवस्तौ ठू. पिपरा पञ्चायत क्षेत्रे रमवापुर (वठान्पुरा) नामिकी जमिन्दारी, भूमिः, आसीत्, भर्तरि दिवङ्गते स्वयं धनवती पुन र्हरिहर सहयोगेन बहुकालं काशीवासमकरोत् वृद्धाऽवस्थायां पुत्रेऽपि दिवङ्गते खिदीम गृह एव शेषजीवनं न्यापयन्ती धार्मिक प्रवृत्तौ वर्तमाना जीवद्‌पोत्सर्गं नामकमात्म श्राद्धं कृतवती यस्याऽहं सगोत्र पौत्ररूपेण तत्प्रतिनिधिभूतः पिण्डदान सेवा मकरवम् । पश्चात्स्वपौत्राभ्यां विष्णुहरि लक्ष्मीहरि गौतमाभ्यां स्वनुनीता वठान्पुरा भूमेः २८ विगाहां स्व निर्वाहाय संनिरुध शेषं ४३ विगाहा भूमिं पुत्र पुण्यस्मृति भूतायै श्री हरिहर संस्कृत माध्यमिक पाठशालायै प्रदत्वा स्वयं पुण्यस्मृतिकी भूत्वा दिवंगतवती ।

सम्पादक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमिदाता श्री विष्णुहरि गौतमः

असौ श्रीहरिहर गौतम गणेशकुमारी देव्योः प्रथम सुपुत्रत्वेन वि. सं. १९८५ वर्षे वर्दिया वन्धुश्री प्रासादेऽजनिष्ट । विपुल वैभव संपन्ने पितुःक्रोडेलालितोऽपि पितृगुणैः सच्चरित्र द्योतकैर्मुदा वृद्धि गतः समये (८) वर्ष एव व्रतवन्धनेन संस्कृतोगुरूभिः स्वयं पित्राच रूद्री वेद व्याकरणं काव्य कोषादीनि क्रमशः पठन् गुप्तरीत्या भारतीय हाईस्कूल परीक्षामुत्तीर्णः समाचार पत्र पठनात्पित्राज्ञातः ।

ततः स्पष्ठमेव लखनौ विश्वविद्यालयस्त आई ए– वी. ए– एम–ए परीक्षा पारङ्गतः सो भारत राजधानी दिल्लीनगर्यां चलचित्रोद्योगकार्ये सफल श्रम एकस्मिन्नेवर्षेलक्षत्रय मुद्रा मर्जयित्वा पितुर्वैभवस्वर्णेसुगन्धि संस्थापयतिष्म ।

तत्पश्चादपि नेपालगंजनगरे श्री वागेश्वरी विद्युद्यन्त्रं संचाल्य पितुः कीर्तिं समुज्वलामकरोत् । अनेकौद्योगिक कार्य निष्पन्नः सरलो मृदुभाषी समुदार शीलश्चसः पितु दिवंगति पश्चात् श्री ५ सर्वकार स्वीकृतां श्री हरिहर संस्कृत माध्यमिक पाठशालां पुनरूद्घाटच स्वयं पाठशालासंचालक समितेरध्यक्ष पदे वर्तमान

स्तत्संचालनाय पितुः पुण्यस्मृतौ कपिलवस्तु स्थितां स्वभोग्यां ६८ विगाहा भूसपत्ति पितामही भ्रातृभ्यामनुमोदितः खिदीम पाठशालाय प्रददौ । ०३१ विक्रमवर्ये नवीन शिक्षा योजनायां जनपद शिक्षाऽधिकारी तरयां पाठशालायां हठात्साधारण पक्षं संयोज्य श्री हरिहर सं. सा. मा. विद्यालयं निर्धारितवान्, एतेनाऽधिराज्येऽभूतपूर्वो विद्यालयः संस्कृत पूर्वमध्यमा तथा साधारण एस्. एल्. सी. परीक्षाद्वय साधयति । वि. सं. ०४० वर्ये विष्णूहरि स्तं विद्यालयं पुनः पितुःसमयइव संपूर्णमध्यमा परीक्षा चालकं विद्यापीठं कर्तुं प्रयतन् वि सं. ०४२ वर्षे स्वयं दिवङ्गतः, इत्थं तस्य विद्यापीठीकरण पवित्रलक्ष्यं अस्माकं हार्दिक परिश्रमंच श्री हरिहर धवलयशसा सहा रोहा वरोहक्रमेण वर्द्धिष्यमाणः प्रस्फुरतु ।

भूमिदाता श्री लक्ष्मीहरि गौतमः

अत्रि सगोत्रयोः श्रीहरिहर गणेशकुमारी गौतमयोः कुक्षितः १९९० वि. वर्षे वर्दिया वन्धुश्री भवनेजातः संपन्नतरः परिवारे लालितः पालितश्चाऽसौ गृह एव नाना पण्डितैः पित्रा च प्रारंभिक शिक्षापन्नो वि. सं, १९९७ वर्षे श्री पंदधिरामगुरूणा पं. धनञ्जयगुरूणाच व्रतवन्धेन संस्कृतः– यत्राहमपि सगोत्रो वेदपाठी सहयुक्तः । पश्चादपि पंडितै गृंह एव शिक्षितो वेदं, लघुकौमदीं, नीति, काव्य, कोष, तर्कशास्त्रादीनि पठित्वा भारतात् आई. एस्. सी. परीक्षामुत्तीर्णवान्, पित्रा स्वनुशासितो व्यवहार कुशलः स्वाट दक्ता निश्चिन्तश्चासीत् । पितरि दिवङ्गते श्रीहरिहर संस्कृत माध्यमिक पाठशालाया राजस्वीकृतिपश्चाद्भ्रात्रा विष्णुहरिणा पुनरूद्घाटयित्वाऽनुमोदितश्च स्वभोग्यां पितुः संपत्ति क. व. ठू. पिपरा ग्राम पंचायतान्तर्निवुवा ग्रामस्थिता २५ विगाहार्धभूमिं पितुः पुण्यस्मृतौ पाठशालायै प्रदत्तवान् ।

इदानी धार्मिकचेष्टः पूजापाठ नित्य गोदानैः प्रातः समयं यापयन् राजनीति मर्मज्ञो दिवा समये स्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यवहार जातं संचाल्य द्वौ पुत्रौ पाठयन् वहुकालं नेपालगञ्जगृहं स्वल्पकालं दाङ्दुश्री ख्दिीम गृहेच सुखपूर्वकं वसन् सन्तुष्टो दुःखसुखानुभूतिमाध्यात्मिकदृष्टचा विवेचयन् वर्तते ।

सम्पादक:

वर्तमान सं. समिते अध्यक्ष श्री नारायण प्रसादगौतम:

खिदीम पोखराथोक गैरावारी स्थाने वि. सं. १९९० वर्षेजात: । स्वल्पेवयसि मातरि दिवगतायां पित्रानुऽशासित: शीलवानभूत, व्यावहारिक नाम्ना अर्जुन इति कथित: किशोरावस्थात एव सामाजिक कार्यरुचिर्गृह-कार्येपि पितरंसंतोपयन् अर्जुन इव वलिष्ठ कर्मठ आसीत् श्रीराम विद्यालय मिडिलस्कूल भवन निर्माणे स्वगृहकार्यइवकर्मकरै: सह सदा कार्यलग्न श्चतुर्भिरेकत ऊह्यमानंदीर्घकाष्टं अन्यत एकल एवोहित्वा तन्निर्माणव्यये २५ प्रतिशतंकार्यं स्वयंसिपेव, एवं स्वास्थ्य पंचायत- श्रीह. सं. सा. मा. वि. भवनान्यपि तद्वलेन निर्मितानि, राजनीतौ निष्पक्ष निर्णायकतया प्रथमं पंचायत परिषदो द्विवारं ग्रा. पं. प्रधानपंचपदे निर्वाचित: इदानीं ह. सं. सा. मा.वि. सं. समितेरध्यक्षोभूत्वादृढ संचालकोऽस्ति, सदस्य-शिक्षक-विद्यार्थी चेतांसि सम्यकसंतोपयतिच प्रशासनिक जनसंपर्के प्रहरीकार्येऽपि प्रभावकारीशैल्या समुचितंजन कार्यं साधयति, सज्जन- मूर्ख-कृपक- धनी-निर्धन वृद्ध-युवकैश्च मीलनशील: स्पष्टवक्ता निरहंकारी निर्लोभतयाच जनप्रियोऽस्ति-इदानींतन पंचायत भवनं प्रशासन निर्देशानुसारं नव कोष्टकं निर्माय पंचायत कार्यालयं-साझा-स्वभवन निर्माणाधीनतथा प्रवसित स्वास्थ्यकेन्द्र-पशुचिकित्सालय कार्यालयानि संचालयति मृत्तरमार्गनिर्माणाय जनता: प्रवोधयन् पेयजल वितरणायापि निष्पक्षं निर्दिशति, एव माधारभूतावश्यकता पूर्त्यै सदाजागरूक: प्रयत्नवांश्च विद्यते ।

सम्पादक:

आहार निद्रा भय मैथुनञ्च
समान मेतत् पशुभिर्नराणाम्
धर्मो हि तेपामधिको विशेषो
धर्मेण हीना: पशुभि: समाना: ॥

खानु, सुत्नु, डराउनु र सम्भोग गर्नु यी सबै कुराहरू मानिस र पशुमा समान हुन्छन् । तर मानिसमा एउटा विशेष गुण धर्म हुन्छ । त्यसकारण धर्मले हीन भएका मानिसहरू पशु समान हुन्छन् ।

हितोपदेश

कला भनेको सिर्जनात्मक कल्पनाद्वारा सत्यको सुन्दर प्रकाशन हो ।

महाकविदेवकोटा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वीकृतिकालाद्वर्तमान प्र. अ. श्रीनारायण गौतमः

अत्रिसगोत्रयोः श्री भोजराज दुर्गादेव्योः कुक्षितः विक्रम सवत्सरे १९८१ वैशाख शुक्लद्वादश्यांतिथौ खिदीम पोखराथोक कार्यग्रामेजातोऽहं नारायणः षोडशमासिके वयसिपितरि दिवङ्गते मात्रा परिपालितः कृतलिपि प्रवेशश्चाऽष्टत्र वर्षे कुलगुरुणा घनश्यामाधिकारिणा व्रतवन्धेन संस्कारितः– १९८६ वि. वर्षतः श्री हरिहरस्थापितायां खिदीम पोखराथोक दशैंघर काष्ठाटीं पाठशालायां श्री केशवराज मरासिनि गुरूमुपस्थित्य श्रीदुर्गाकवचार्गला कीलकान्-श्री टीकारामगुरोश्चण्डीं रुद्रीम् श्री घनश्याम पौड्याल गुरोर्मुहूर्त चिन्तामणि गणित साधारण नियमांश्च क्रमशः पठन् १९९४ मार्ग शुक्ल प्रचमी दिने विशेष प्रतिष्ठितायां श्री हरिहर संस्कृत पाठशालायां श्री यदुनाथार्याल गुरोः श्री शुल्क यजुर्वेदोऽधीतः– १९९६ माघ शुल्क पंचमितः श्रीरामजी प्रसाद गुरो लंघुकौमुदी तर्क संग्रह हितोपदेश विदुरनीति अमरकोषांश्च विंशतिमासेष्वेधीत्य श्री टङ्कनाथ पराजुली गुरुतः सिद्धान्त कौमुद्या अजन्त स्त्रीलिङ्गान्त भागं पठमानः श्री वेदगुरोः सत्प्रेरणायाप्रधानाचार्यं श्री दधिरामादि गुरुणां सहमत्या च वेदानुकूलान् ग्रन्थान् घनश्याम पौड्याल प्रभृति गुरूभ्योऽधीत्य श्री टङ्कनाथ गुरुनामत आवेदन पत्रंपूरयित्वा (वास्तविकं जन्मतिथौ पूर्वोक्तायामेव सत्यामपि गुरुणा ईशवो आधारतो जन्मसमयाऽभिलेखने वि. सं. १९८३ आपतितः सर्वत्र व्यवहारेऽयमेव प्रचलितोऽस्ति । वि. सं. २००० चैत्रे वाराणसेय गभर्नमेंट संस्कृत विद्यालय (कलेज) नियन्त्रणे श्रीशुक्ल यजुर्वेद संपूर्ण मध्यमा परीक्षायां संमिल्य प्रथम श्रेण्यामुत्तीर्णः, तदा काष्ठमंडपाद्गताः सह परिक्षार्थिनः केशरीराज पाण्डेय वाल्मीकि पौड्याल प्रभृतयःसुपरिचिता आसन् अहं पुनः २००१ वर्षे सह परीक्षानिर्गतेन दामोदर गौतमेन सह समय यापनाय भारत लखनौ नैमिषारण्य सीतापुरादि प्रदेशेषु विना चीटिकया भ्रममाणो रेल प्रहरिभिर्निगृहीतो विद्यार्थी सत्वेन मुक्तश्चापि पित्तज्वरार्तो गृहमागत्याष्टौमासान् रुग्णशय्यायां शयनोत्थानं कुर्वन् रुमयेनोल्लाघश्च २००२ वर्षे वेदशास्त्री ग्रन्थान् पिपठीषुः रानीपोखरी संस्कृत पाठशालायां प्रधानाचार्यं श्री सोमनाथ सिग्द्याल गुरूमुपस्थित्या भीप्सित प्रकटने पहाडी वैदिकोसीत्युपालंभितो मधेसीया वैदिकाः कथंभवन्तिगुरोरिति विवादे वाल्मीकि पौड्यालेन पूर्वपरिचितेन सह प्रतिस्पर्धां कारयित्वाऽपराजितो गुरुणा सवात्सल्यं कथितः– यत् वत्स ! सम्यगधीतोसि । परमत्रेदानीं वेदभाष्याऽध्यापकाभावादन्यत्र किंचिदधीष्वेति प्रत्याख्यातो वेद ज्ञानाय जातोत्सुको वज्राऽहत इवाऽभवम् । सायं निवासे खिदीम एव व्याकरण मध्यमोत्तीर्यागत्य शास्त्री तृतीय खण्डं पठयता भागिनेय भ्रातृजेन ज्ञानहरी पौड्यालेन वेद विश्लेषणाय पूर्वमिमांसा पठनमावश्यकमित्याश्रुतः श्व एव श्री जुननाथ पण्डित गुरूमभ्युपेत्य पूर्वमीमांसा शास्त्री प्रथम चरणं पठितुं प्रारब्ध वान्, नवमे दिवसे श्री वडा गुरुणा खिदीमोत्तीर्णो विद्यार्थीति त्रिधारा छात्रावासे पाकशालायां संमिलेतोऽभवम् ।

तत्र ज्ञानहरि, काशीनाथ, पुष्करनाथ होमनाथ, वालकृष्ण, भोजराज प्रभृतयः खिदीमादेवागताः, अपरे पश्चिमीया राजेश्वर देवकोटा, श्रीभद्र शर्मा, वैकुण्ठ गौतम, कमलराजाच्युतराजौ रेग्मिणौ कृष्णप्रसाद रयाङ्जीयादयः स्निग्ध मित्राण्यासन्, अहं वैदिकत्वेनैकादश नंवरी मण्डलेऽपि संयुक्तः– श्री ५ महाराजाधिराजाधिराज शुभजन्मोत्सव निमित्तके शतरुद्रीपठने श्री पशुपतिमन्दिरे संवृतः– राजप्रसादमाहूतः श्री ५ श्रीभुवन हस्ताद्विवारं तिलकपात्रमादत्तम्, पर्वसु राणाप्रसादेष्वपि संगताः– पाठचं समाप्य माघे वाराणसीं प्रेषीतः संस्कृत विद्यापीठे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(क्वीन्स कलेज भवने) शास्त्री प्रथमखण्ड परीक्षां दत्वा प्रथमश्रेण्यामुत्तीर्णः। तत्पश्चात् भक्तिमती रुपेण काशीतीर्थं निवसन्त्या माता मही हरिकला देव्याः सदाग्रहेण नेपाल पठनं विहाय, काशी गोयन्दका महाविद्यालये श्री जुननाथ गुरो गुरूं अ. चिन्ह स्वामिनमुपेत्य द्वितीय खण्ड पठन मारब्धम् तत्र जगदम्वा राणायास्तुलादाने एकः सुवर्ण मोहरीऽपि प्राप्त आसीत्, एवं त्रिचतुरोमासान् पठित्वा पित्तज्वरोक्रान्तो गृहमागत्य कियद्भिर्दिनैः स्वस्थोभूत्वा काशीमेव गन्तुं कृतनिश्चयो गुल्मी मान्कोट निवासिना मातुलेन भूवनेश्वर ज्ञवालिना हेमराज, भेषराज, लालप्रसाद, हीरंराज, सूर्यप्रसाद, रामप्रसाद, गोविन्दादीन् पुत्रभ्रातृजान् पाठयितुं मनुरूद्धो वि. सं. २००३ तो वर्षत्रयं गृह-पाठशालामचालयम्, तत्पश्चान्मम पाठन शैल्याश्चरित्रेण च प्रभाविता मातुलाः टेकराज, शङ्करप्रसाद, होम नारायण, भीनप्रसाद, अर्कनाथ, शिवप्रसाद, कृष्णराज, नेत्रप्रसाद, भुवनेश्वरादयः २००५ वि. वर्षात् श्री मोति-नारायण, आत्मविनायक, आत्मेश्वरमन्दिर प्राङ्गणे, भव्यं पाठशाला भवनं निर्माय श्री उमा, लालकुमारीति कनिष्टमातृभ्यां पाल्पामाडी, गुल्मी खर्ज्याङ् स्थान स्थितं ६६.४ द्रोणधान्योत्पादकं क्षेत्रं च पाठशाला संचालनार्थं दापयित्वा मां प्रधानाध्यापकपदे रामप्रसाद वाग्ले नामकं स्थानीय व्यक्तिमक्षराऽभ्यासे नियुज्य मान्कोटेयान् परिवेशस्थांश्च वालकान् गुणस्तर क्रमेण रुद्रीवेद व्याकरणं चाध्यापयितुं सम्यग्व्यवस्थामचालयन् । एवमस्यां नवम वार्षिक जयन्ती पर्यन्तं अनेकान् निष्णातान् कृत्वा २०१२ वि. वर्षे पाठशालाऽध्यापनं विहाय काशी साङ्ग-वेद विद्यालये प्रातः श्रीगणेश दीक्षित आप्ले गुरुतः श्री शुक्ल यजुर्वेद विकृति दिवा श्री हरिराम शास्त्रीगुरुतोनव्य-न्याय सिद्धान्त मुक्तावलीं च पठित्वा षण्मासान्ते पुनर्मान्कोट संस्कृत पाठशालाध्यापनं वर्षद्वयं कृतम् तच्छरदि मातुलै सह श्री मुक्तिनाथ दर्शनं विहितं मान्कोटाध्यापनमपि विहाय ०१५ वि. वर्षे गृह एव श्रीराम विद्यालय मिडिल स्कूले स्वयंसेवकाध्यापकत्वे नियुक्तो हरिजन शिक्षा संचालन रूपे धार्मिक संघर्षे सफल प्रयासोऽभवम्।

तत्पश्चात् ०१६ श्रावणतः श्री पद्मोदय पाल्पा पब्लिक हाईस्कूले नियुक्तः संस्कृत नेपाली पाठनमक्षर लेखन शैलीं वाटिका निर्माण कौशलं चाशिक्षयम्, तस्मिन्नेव वर्षे विजया दशमी पश्चिम काले श्री महेन्द्र हाईस्कूलं गुल्मी तमघासं च स्वयं सेवमानः श्री ५ महाराजाऽधिराज महेन्द्र वीर विक्रम शाहदेवस्य गुल्मी भ्रमण मभिनन्दितवान्।

तत्रान्तराले गुल्मी पेयजलस्य मृत्तर मार्गस्य च संभाव्यताऽध्ययन क्रमे भारतीय ऐडमिशन कलेज ललितपुर प्राध्यापकेन शिवदान सिंह जाटेन सह प्रथमं दग्धरेशुङ्गाश्रम जीर्णोद्धाराय व्ययाङ्कनं कुर्वन् पेयजलनि मित्तकान् गुल्मी दरवार, चारपाला' मान्कोट दौंघा, खिदीम, पाली प्रदेशान् मार्गं निमित्ते वल्कोट, वाङ्गला अड्गुरी, नरपानी, ठाडा, रजिया, पत्थरकोट ग्रामान् अर्घातोसतंघासं च संयोज्य पुनः पेय जलाय धुर्कोट पुर्कोट श्रोतो भूतं वाङ्ग्रा शिखराऽध्ययनंचा करवम्। एवं भ्रमणेन नेत्र पीडा पीडितोऽहं तंघास सेवामपि परित्यज्य स्वग्राम एव स्थितं श्रीराम विद्यालय मिडिल व्याघ्रवागुरायां स्थानन्तरी कृत्य एकलः पुनः स्वयंसेवक एव संचालन मकार्षम्। षण्मासं तत्सेवां विधाय ०१७ आषाढतः पाल्पाऽर्गली जुद्ध प्रसादे कलेज अफ एजुकेशन द्वारा संचालिते नर्मल प्रशिक्षण शिविरे प्रमुख प्रशिक्षक ओंप्रकाश गुप्तादिभिर्नवीन शिक्षाऽधारेण प्रशिक्षितः कलाप्रदर्शनीक्रमे विद्यालय भवन निर्माण कलायां प्रथम–स्वर्णपदकेन पुरस्कृतोऽप्युत्तम श्रेण्या उत्तीर्णं मान्कोटरघात्ममिडिलस्व ले चतुरोमासानध्यापयम्।

ततः १८।६।१। दिवसात् गृह एवं निवसन् श्री सरस्वती प्रा. विद्यालये खिदीमामझाँडाँयां नियुज्य स्वीकृत–निरुद्धं सर्वकारानुदानं प्रवर्तयित्वा सप्तमास पश्चात्तमपि विहाय ०१९ श्रावणे काष्ठमण्डप त्रिपुरेश्वर स्थिते घरेलूद्योग काष्ठकला विभागे श्री शि. उ. मन्त्री कीर्तिनिधि विष्ट सौजन्येक दिनमुपस्थित्य काष्ठतष्टन कार्यमपि कृतवानस्मि, अपरदिनेतशाखा प्रशिक्षक विवरणेन भग्नाशस्तमपित्यक्त्वा श्री पाणिनि व्याकरण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यालयं खिदीम पडेना दहं संचालयितुं श्री ५ महाराजाऽधिराज महेन्द्र वीरविक्रम समक्षे विनतीपत्रं निवेद्य काशीं गत्वा तदर्थं प्रचार पत्रं मुष्ठि भिक्षा संकलन पत्रं च प्रकाश्य भैरवहास्थितं लुम्बिनी अञ्चलाधीशं ताराप्रसादोपाध्यायं च दर्शयित्वा स्वनुमोदि तो गृहं प्राप्त अराष्ट्रिय तत्वाऽभियोगे गुल्मी वडाहाकिमतो निग्रहीतः ट्रिव्युनल सभायां मौखिक विवरणं प्रस्त्युत्य मासिको पस्थिति नियमेन त्रिमासं धावित्वा विमुक्तः ।०१६ पौषतो ठाडा सिमलपानी प्रभाकर प्रा. विद्यालये वृतः स्वीकृति निरुद्धानुदानं प्रवर्तयन् जनप्रियमध्यापनं प्रधानपञ्चस्याऽनौपचारिक साचिव्यं द्विग्राम विवादास्पद विद्यालयस्थानं समदूरे कमलपोखरी चत्वरे दृढीकृतं च कृत्वा मासत्रय पश्चात् श्री ५ महाराजाऽधिराज विनतीपत्रोत्तरानुसारं चैत्र शुल्क दशमी (१९ गते) तिथौ खिदीम पडेना दह शिखरे स्वयंसेवक रूपेण श्री पाणिनि व्याकरण विद्यालयं ०२० ज्येष्ठ शुक्ल दशहरातः श्री सिद्धाश्रमं ब्रम्हचारि कृताऽग्नि परिचरण विधान सहितं वैश्वदैविक गुरुकुल प्रणालीं च संचाल्य सार्धं द्विवर्षं सेवायां श्री शालीग्राम शर्मणा वाराणस्यां निर्मापितायाः श्री पाणिनि मूर्तेर्भैरहवातः शकटयान जनसहयोग स्कन्ध वहनैश्च दहमानयनं च कृतम्। तत्रापि भौगोलिक विवादग्रस्य राजनीति मिश्रितया जनभावनयाऽसहमतो हं तदपि स्थानं परित्यज्य पञ्चमासदशदिन ०२१।१२।२३–२०२२।६।३. पर्यन्तं क्षुण्णं श्रीहरिहर विद्यालयं ०२२।६।४ दिवसात् गठित सं. समिति नियोगेन स्वयंसेवक प्र. अध्यापकोऽहं पूर्वकालिक प्र. अध्यापक धनञ्जय मरासिनि च सहमत्य पुनः संचालनमकार्षम् मार्गान्ते वार्षिकीं परीक्षां समाप्य विद्यालय स्वीकृति याचनाय रुप्यक त्रयमादाय श्रीरामेच्छायां प्रस्थितः प्रथमं श्रीहरिहर संमति सहयोग प्राप्त्यर्थं वर्दियां जिगमिषु भैरहवायां हरिहर दिवङ्गतिश्रुत्वाऽतिक्रान्ताऽशौच समाप्य तत्पुत्रयो विष्णुहरि लक्ष्मीहरि गौतमयोः संमत्यैं किशोर गौतम सहायेन नेपालगञ्जं गत्वा तयोः समक्षे प्रस्ताव स्थापिते पितुः कीर्तिस्थिरयितुं तौ स्वमित्रं दीर्घराज कोइराला व्यक्ति पत्रेण किंकर्तव्यतां स्पृष्टा मां प्रतीक्षायैं अनिरूद्धवन्तौ, ततोदीर्घसमय माश्वस्तोह विष्णु हरिणा भ्रातः। वयं पितृव्यव्हारैः किंकर्तव्यमिति भ्रान्ता आस्वः मासेनैकेनाऽपि मित्रोत्तरं नागच्छत्, अत इदानीं पाठशाला विषयकं किमपि सहमतिं वा साहाय्यं दातुमसमर्था इति प्रत्याख्यातः– श्रीरामेच्छामेव शिरोदधानोऽहं विश्वनाथ मातुल सहयोगेन परश्व एव काष्ठमंडपं गत्वा मदीयजीवन प्रथम शिष्यस्य मातुलेय भ्रातु हेंमराज ज्ञवालिनः सौहार्द्रेण निवास भोजनादि सौविध्य सत्कृतः श्री शिक्षा मन्त्रालये पाठशाला स्वीकृत्यै निवेदनमकार्षम्। हेमराज काशीराजादि सहयोगेन मासद्वये समये अनुकूल प्रतिकूल व्यापारेऽपि श्री शिक्षा निर्देशक केशरीराज पाण्डेयकृत पूर्वपरिचय वलेन ०२२।१२।४ गते शि. मं. माध्यमिक शिक्षा शाखातः श्रीहरिहर सँस्कृत माध्यामिक (मिडिल) कक्षाष्टमी पाठशालायाः सानुदानंस्थायिनी राजस्वीकृतिः पारिता। १३ गते स्वगृहमागत्या परस्मिन् प्रातः स्वगृहागताय विष्णुहरये स्वीकृति वोधार्थपत्रं दर्शितम्। सोऽपि पितुः कीर्तिमक्षुण्णां मन्वानः सगद्गदोमां जेष्ठ भ्रातरमित्यालिङ्गच स्वकर्तव्य प्रश्नमकरोत्, अहमपि विहित स्वेष्टकार्यप्रफुल्लो भ्रात! अद्यैव दिवसे तवैवाऽध्यक्षतायां संचालक समितेगंठनं, अध्यापक नियुक्ति राजस्वीकृत पाठशालायाः पुनरुद्धांटनं स्वहस्तेनैव कृत्वा दिवङ्गतस्य स्वपितुः पुण्य स्मृत्यै वामपि स्थायिनिमर्थसंचिति व्यवस्थापयेति संप्रेरितवान्। सचार्थराशि स्रोतसे मध्यदेशस्थां स्वपरिवार भोग्यां पितु भूंमि संपत्ति प्रदातुं प्रतिज्ञां कुर्वन् वि. सं. २०२२।१२।१४ दिवसे राजस्वीकृत श्री हरिहर सं. मा. पाठशालायाः स्वपूर्व भवन एव पुनरुद्धाटनं मत्प्रधानान् त्रीनध्यापकान्नियुज्य द्वि : सहस्र रूप्यकै स्तात्कालिक संचालनं निर्दिष्टवान्। गौतमौ च सहमत्य स्वपूर्व प्रतिज्ञानुसारं श्री ५

एवं निकट समये द्वावेव भ्रातरौ पितामहीं योगकुमारी महाराजाऽधिराजं संवोध्य पितुः पुण्यस्मृत्यै जि. कपिलवस्तु ठूलोपिपरा ग्राम पंचायतान्तर्गतां ६८ विगाहा भूमि क्षतेः पूर्ति विना प्रदातु विनीतौ पाठशालायै वोधार्थपत्रं दत्तवन्तौ। तदादाय ०२३ शिशिरावकाशे काष्टमण्डपं गतेन मया श्री ५ महाराजाऽधिराजाज्ञां प्राप्य शिक्षा मंत्रालय द्वारा भूमिसुधार मंत्रालय भू सु. विभाग भूमि (फिल्ड)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यक्रम शाखात उक्तां भूमि पाठशालायै व्यवस्थापयितुं जि. कपिलवस्तु भूमिसुधाराय स्वीकृतिं पारयित्वा बोधार्थो हस्तेधृतः–अस्मिन्कार्ये ममसर्वसौविध्याय च मान्कोट द्वितीय शिष्यः (मातुलेय भ्राता) भेषराज ज्ञवाली नुजनोऽभवत्, ०२४ वर्षे क. व. भू. सु. कार्यालयो वर्दिया भू. सु. कार्यालयं संवोध्य हरिहर–योगकुमार्योः, ७ नं. विवरण प्रेषणाय पत्रं लिखित्वा पाठशालायै बोधार्थं दत्त वान्, तदनुसारं प्रौषे क. व कार्यालयमुपस्थिते मयि पुन आकाशवाण्या त्वरितो वर्दिया कार्यालयो भूमिप्रशासनकार्य व्यग्रतयेदानीं तद्दातुमसमर्थतां प्राकटयत्, तेनो- द्विग्नोऽहंमुपायान्तरं जिज्ञासुः समुक्तो यत्–स्वयंगत्वा तदुत्तार्य प्रमाणीकृत्य चानर्यासि चेत् कार्यवाहिकं चलि- ष्यति, इदं मुखकथनमादाय बन्धुश्रीं गत ऽहं लक्ष्मीहरि सहयोगेन कार्यालये, निवेदनंदत्वा सर्वं दशदिनेषु स्वय- मुत्तार्य प्रमाणयित्वा च, क. व. कार्यालयाय प्रैषयम्, ततः कार्यवाहिके प्रचलिते भू. सु. स्वीकृतिमादाय क. व. माल कार्यालयोपस्थितो मासिक नियमेन ०२७ श्रावण पर्यन्तं धावन्, केनापि प्राड्विपाक (वकिल) भूतेन महानु- भावेन ६८ विगाहा मध्यतः ४२ विगाहां मृतपरित्यक्त (मर्ता पर्ता) नियमेन-आयकरन्यायालयतः स्वयं ग्रहीतुं प्रमाणपत्रं पारयता पाठशाला प्राप्ति र्विच्छिन्नेतिमाल कार्यालयेन श्रावितस्तत्कालमेवाञ्चलाधीशं निवेद्य, विद्या- लयप्राप्ता भूमिः कथं निरुद्धा ! इति कर्यालयत्रय (क. व. माल, जि. पं. विशेषाधिकृत) निर्णयोऽत्र प्रेषणीय इत्यादेशं कारयित्वा पुनः सप्तमासान्धावमानः क.व. त्रिसंयुक्त कार्यालयेन पाठशालाया प्राप्ता भूमि र्हरिहराधिकार एव वर्तमाना नमृतपरित्यक्ताधीना, अतः पाठशालानामनि शीघ्रमङ्कनं कार्य मिति निरूप्य पत्रे पारिते ०२७। १२।१३ दिवसे मालकार्यालयतः ६८ विगाहा भूमेरेखाङ्कनं (वहालीपत्रं) पाठशालानाम्नि मन्निक्षेपे संपन्नम्–एवं पाठशालाया एवोपभोगः संचालनं, करविनयनं भूस्वामित्वभाग, (जमिन्दारी खान्की) प्राप्तिश्च द्विवर्षं निर्वाधा प्रचलिता। ०२६ चैत्रे मया वाराणसेय सँस्कृत विश्व विद्यालयतः पूर्वमीमांसा शास्त्री परीक्षा संपूरिता आसीत्। ०२९ वर्षे तत्र भूमि प्रशासन नियमे लग्ने सर्वाऽपि कपिलवस्तु भूमिस्थितिर्निलम्बिता नवीन रीतिकं भूस्वामि- त्वाङ्कनं चलितम्, ०२६ वर्षेयस्य नामनि रेखाङ्कनं जातं तेसर्वे तत्सुल भन्ते, पाठशालायायास्तु तदा तात्कालिक भूस्वामिनो हरिहर योग कुमार्यो नाम्नि रेखाङ्कने जाते ०२७ चैत्र मात्रे तद्भूस्वामित्वं प्राप्त मासीत् तेन नव नामाङ्कनं वा करप्रणेननं रुद्धमिति पुन स्तत्प्राप्तये भूमि प्रशासन कार्यालये निवेद्य मासिकोपस्थितिं चदत्वा करं मालकार्यालयेऽधिक्षिप्तम्। अत्रान्तरे पूर्वं ४२ विगाहां जिग्रहीषोर्मृपश्चात् तच्छ्रीमती ह.सं.पा.प्र.अ. भूतो नारायण गौतमोमत्स्वामी प्राप्त ४२ मध्यतो विगाहाद्वयं वलेन विकर्षन् पाठशालां पोषयति, अत रतदाच्छिद्य मम भोगाय विधेयमिति क. व. न्यायालये वादिनी जाता, तत्प्रति वदन्नहं वर्षत्रयंमासिकोपस्थितो धावमानः सत्य प्रमाण– ननेन सिद्धेन सात्राङ्कृतोऽहमुपायान्त राऽभाऽवाद्हं तस्मै समर्थ्य श्रीरामं स्मृत्वा निर्भीकोनिमीलितश्च क्षणादुन्मी- लितो व्याघ्रं नापश्यम् परन्तु विगतभयेन शरीरं कंपितम्, तथैव कदाचित्कंचन नदीतरणे प्रवहणं कोपहवा कुल्यां न्रुडनंचोपभुक्तम्।

इत्थं ०३१।६।१५ पर्यन्तं स्वरूपे प्रचलिता पाठशाला १६ दिवसे नवशिक्षा योजनाचक्रे जि. शि. अ. प्रभृतैः स्थानीयै रेव पाठशाला सर्पति दृष्ट्वा मद्विरोधमविगणय्य समीपस्थं नग्नं श्रीराम विद्यालय हाईस्कूलं संयोजयित्वा श्री ह. सं सा. मा. विं नामा एक विद्यालयोऽभवत्, अहमपि सनातन प्र. अ. पदे नियुक्तः, एतादृश समन्वयोऽधिराज्ये असौ एक एव। ०२४ वर्षे अंचलसाहित्य संमेलनस्थाने वल्कोटे प्रस्तुते –मम द्वे अक्षिणीति व्यङ्ग निबन्धो व्यवहार प्रत्यक्षे आपतितः।

गतो ०३२ वैशाखे भू. प्र. कार्यालयतो ६८ विगाहामध्ये १७ विगाहां डीमार्केशनैलानीमिषेण सर्वकार मधिग्राहयित्वा श्री ह. सं. पाठशाला नाम्नि ५१ विगाहा मात्रस्य नव भूस्वामीत्वमङ्कितमपि विद्यालय संयोजन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षधारी जि. शि. अ. अर्घाखाँची संयोजित नाम संशोधन पूर्वकं स्वयं तज्जग्राह, परन्तु भूमिःसहयोग समिते रेवाऽधिकारे व्यवस्थिता, तत्रापि ०२२ वि. वर्षतः स्थितो बाल प्रा. वि. पूर्वाऽधिवास्यधिकारं प्रयुज्य २३ विगाहामात्म सात्करोति, राजमार्ग दक्षिणोत्तरे १–१५ भूमिर्वास्तुयोग्यतया नव शिक्षा योजनात्पूर्वमेव पाठशाला क्षतिपूर्त्यै सं. समिते र्निर्णयतो विक्रीताऽसीत्– काचित् स्वयं निम्नोन्नतेति सर्वे मिलथित्वा ११ विगाहाकल्पाऽनुत्पादिकेति बाल प्रा. विद्यालयाय निःशुल्कं प्रदातुमन्यत्सर्वामिदानींतन प्रचलितेन मूल्येनौपचारिक विक्रयं कृत्वा धन राशि–मक्षय कोषे निक्षेप्तुं कार्यवाहिकं चलति, शेषो ४० विगाहाऽऽयो २०२५ वर्षे ४१००। मात्र प्राप्तश्चेत् क्रमशो वर्धमान इदानीं ७६७०० कल्योजात आस्ते । १७ विगाहा पुनः प्राप्त्यै श्री ५ सर्वकारंप्रति कार्यवाहिकं चालयन् गतमाघ २७ गते अ. खा. भ्रमणशिविरे श्री ५ महाराधिराजं विनीतवानस्मि । इत्थं मन्निक्षेपभूतां विद्यालय संपत्ति निर्विवादां विशुद्धां वा कर्तुं दृढ प्रयत्नशीलश्चास्मि ।

वि. सं. ०३५ वर्षे शिक्षा शास्त्राध्ययनसंस्थाने रामशाहपथे वि. एड प्रशिक्षण प्रथमसत्र शिविरे आहूतः पञ्चाशान् प्रशिक्षितश्चाऽहं भावग्राही प्रशिक्षकाः शब्दग्राहिणो भूत्वाऽसामंजस्येन द्वितीय सत्र प्रशिक्षण भागं नाग्रहीषम् ।

अस्माकं षोडश पूर्वपूरुषः श्रीधर गौतमः स्वजन्म भूमिजुंलासिजाप्रदेशं विहायपूर्वमागच्छन् ज्यौतिष विद्या चमत्कारतो गुल्मी राजा रामसिंहवर्मणः सकासात् विद्यावीरतायाः पुरस्कार स्वरूप स्वेच्छा वृतं तात्का-लिकखिदीम क्षेत्रं (इदानीं पंचायतत्रये २२ वार्डे विभक्तं, दिनै पद भ्रमण बलेन प्राप्य १६६९ वि. संवत्सरे पोखराथोकस्थले निवासमकरोत्, तस्याऽयेन दशैंघर चत्वर पूर्वकोणे कुलदेवी स्वरूपां श्री दुर्गादेवीं प्रतिष्ठाप्य भक्त भजन भवन रूपां काष्ठटींच निरमापयत, तथैव मैदानेऽपि श्री चौराली देवीं यूप संस्थापनं सार्वजनिक सभारूपं काष्टटीं द्वयनिर्माणं चकृत्वा वार्षिकं शारदिकवान्तिक विशेषपूजां वेद चण्डीं देवी भागवत पाठ सहितं नवरात्रमहोत्सवं ब्राह्मण द्वारा स्वयंच कुर्वन् सत्यशिवसुन्दर चरित्रेण जन मनः संतोषयँश्चासीत्– एवं बहुसमये व्यतीते वि. सं. १८६८ वर्षे तस्यैकादश संततिः श्री विसूपाध्यायनाम्नि श्री ५ महाराजाधिराजः सुरेन्द्र वीरविक्रम शाहदेवस्तेनैव खिदीमाऽयेन दशैंघर दुर्गा पूजा महोत्सवादिकं कृत्वाऽवशिष्टात् १४ रूप्यकं पाल्पा तोषखाना द्वारतः श्री ५ सर्वकाराय निष्क्रयं समर्प्या प्यवशिष्टं स्वयं सपरिवारो भुंक्ष्येति राजप्रमाणं । (लाल-मोहर पत्रं) अभिलिख्य दत्तवानासीत् ।

ततः सः पूजामहोत्सव औपचारिक भव्यरूपेण प्राचलत् ततोऽपि चन्द्रसमशेर समये खिदीमस्य नदी–मातृकं क्षेत्रं सर्वकार द्वाराऽधिग्राहयित्वा देवमातृकाम न भूमि पूर्वोक्त सर्वकार्याय स्थिरीकृतेति वि. सं. २०१५ पर्यन्तं यथापूर्वं सः पूजामहोत्सवः प्राचलत् ।

वि. सं. २०१६ तः श्री ५ राज्ञो वीरतोन्मूलन क्रमे खिदीम जनता भोगाऽनुसारं नामांकनेन कराऽऽयोपि राजस्व लग्नो जातस्तथाऽपि स्थानीया वयं सर्वे पूर्वपुरुष परंपरां श्री दुर्गापूजा महोत्सवंच सहयोगेन सन्धार्य नव-मन्दिर निर्माणंच कृतवन्त आस्मः । ०३८ चैत्रान्ते पुनरहमुपर्युक्त श्री ५ राजप्रमाण पत्रानुसारं स्वभोग वार्तां विहाय केवलं श्री दुर्गापूजोत्सवाय राजकोषतो वार्षिकं–२४४० रूप्यकानुदान सहितां स्थायिनीं राजगुठी व्यवस्थां प्राप्नुयामिति अ. खा. मालकार्यालय द्वारा कार्यवाकिं चालितवानास्म्– ०३६ वि. वर्षेऽत्ररेखामाप प्रसंगे मालकार्यालयतो दैवीं राजकीयां च भूमि विलगय्य रेखा कर्तव्येति त्रिपंचायताधिकृतान् संबोध्य जि खुमानन्दाय महयं तद्वि भाजने सहयोगाय बोधार्थपत्रं दत्तम्, तेन जनमानसे गौतमाः पुनर्वीरतांस्थापयितुं प्रवृत्ता इति विक्षिप्ति ज्ञात्व तत् शमनायाऽहं बद्रीनाथ खुमानन्दाभ्यां सह अर्घाखाँची मालंगत्वाऽत्रोचामयत् खिदीम भूमिः सर्वा राजस्वाधीऽनेति राजकोषतः २४४० मात्रं दुर्गापूजायै प्राप्तयै मन्निवेदन कार्यवाहिकमग्रे चालयित्वा ०१६ वर्षीय नामाङ्कनानुसारं सर्वेषां नामनि रेखाङ्कनं भवेत्–ममस्वोभोगाय वीरता वा गुठीनाऽपेक्षिता अतो दैवी राजकी विभागाऽत्रश्यकता नास्तीति सामंज्यस्यं विधाय श्वः शिविर प्रमुखेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्रं प्रेषयितुं लेखयित्वा यावत्सन्धिखर्कं दुर्गामन्दिर प्राङ्गणे गतास्तावत् खिदीमेलीयाः शतशस्तत्रागत्वा मांकण्ठग्राहं गृह्णन्तोऽकथयन्यत् :— यष्मानष्टादश शतान् खादितुमुद्यतोऽसि ? तव रक्तं पिवाम इति, अहमपि श्री कुलदेवी दुर्गा पूजन कार्यं वा साधयेयं देहं वा पातयेयमितिसन्नद्धो हर्षेणतान्, सखायः ! अहं दुर्वलोऽस्मीति रक्तपान मात्रेण नतृप्यथः किन्तु कीकसं संघृष्याऽपि खादेतचेत्तृप्ताभविष्यथेति कथयन्नेव पश्यानियत्-प्रहरिणो मां परितोरक्षन्ति, जि. पं. सभापतिःर्मालकर्मचारी धर्मःखुमानन्दो वद्रीनाथश्च दिवाभूत निर्णयं श्रावयित्वा तानाश्वासयन्ति, अन्तिमेश्वः प्रातर्जि. पं. कार्यालये गठितव्यमिति सर्वे विश्रान्ताः श्वः सर्वेरेखाङ्कन संचालनपत्रं श्रुत्वा दृष्ट्वा संतुष्टा मामागत्याऽकथयन्यत भ्रात ! वयं भ्रान्ता ह्यः सायं तवोपरि यत्कृतवन्तस्तत्सर्वं क्षयाम्यतु इति पादमूले प्रणताः ।

०४१ पौष २७ दिवसे कनिष्टपुत्र दशवर्षीय सुश्रवा गौतमेन सह विद्यालयतो गृहावकाशमादाय गृहात्प्रस्थितः पदयात्रांकुर्वन् रापती भेरी, सेती, महाकाली, कर्णालीति पञ्चाञ्चलान् दीपालय, सुर्खेतेति द्वौविकासक्षेत्रौ खप्तडपर्वते श्रीयोगिराजः, रारातडागः, कनकसुन्दरी दुर्गा, ज्वालामालिका, स्वर्गद्वारि आश्रमश्चेति पञ्च धार्मिक दृश्य स्थलानि प्यूठान्, दाङ, देउखुरी, वांके, वर्दिया, कैलाली, डोटी, डडेल्धुरा, वाजुरा, वझाङ्, मुगु, जुंला, कालीकोट, दैलेख, सुर्खेत, रोल्पा, इति पंचदशजनपदान् भ्रमित्वा पंचोत्तरशत दिवसेषु श्रीरामेच्छया सकुशलः पुनर्विद्यालय सेवायामुपस्थितोऽभवम् । अस्यां यात्रायांखप्तडयोगिन उपदेशाः रारातडाग तट निवासश्च रोमांच कारिण्यौघटनेस्तः ०४२ वि. सं. वर्षे एकादश शिक्षा दिवसे शिक्षा क्षेत्रे प्रशंसनीय योगदान प्रदान गुणेन अ. खा. जिल्ला शिक्षा समिति द्वारा पुरस्कृतश्चासम् ।

२०४४ मार्ग २८, २९ पौष १ गतेषु श्री विद्यालयस्य १९९४ विशेष व्यवस्थिति गणनातः पञ्चाशद्वार्षिकी सुवर्ण जयन्ती समारोहः संमानितो यस्येयं स्मारिका, प्रकाशनं संपादितवान् तस्मादेव माघ ७ गते दिवसात् अत्र संस्कृत पूर्वमध्यमा तथा साधारण एस्. एस्. सी. परीक्षा केन्द्रो निर्धारितः ।

२०४६ वि. वर्षेऽहं पञ्चदश शिक्षा दिवसोपलक्षे शैक्षिकक्षेत्रे उल्लेखनीय योगदान कारणतो राष्ट्रियशिक्षा पुरस्कारं लब्धवानस्मि ।

वि. स ४६ ज्येष्ठमासे श्वासकार्शमृंतकल्पोऽहं दुर्गाप्रसाद गौतम वैद्य द्वारा किञ्चिदुन्मीलितः पुनर्वाताऽर्श ग्रस्तस्तुलसीदास मोहन पुत्राभ्यां काष्ठमण्डपं नीतः पाटनऔषधालयेनोपचारितो माघे पुनर्गृहमागत्य श्री ५ महाराजाऽधिराजस्य पश्चिमांचल विकाशक्षेत्र भ्रमण क्रमे सन्धिखर्क शिविरे स्वस्तिवाचन पूर्वकं स्वागताऽभिनन्दनं कृतवान्, विद्यालयस्य १७ विगाहा भूमि पुनः प्राप्तये पौषे श्री ५ राजद्वारे माघे सन्धिखर्क शिविरेच विनतीपत्रं निवेदितवानस्मि ।

उपर्युक्तां श्री दुर्गापूजा संवन्धिनीं कार्यवाहिकीं धावन्नहं श्री ५ सवंकार मालपोत राजकोष, विवेचनेनस्थायिनी पूजा व्यवस्था भवितुमर्हतीति निर्णये कृते वि. सं. ०४३ वर्षे अर्थमन्त्रालयः परस्मिन् वर्षे स्थायी व्यवस्थाकरण पूर्वकमस्मिन्वर्षे एक कालिक रूपेण २४००। रूप्यकं राजकोषतो निष्काश्य देयमितिपत्राऽधारेण अ. खा. राजकोषद्वारा तत्प्राप्तम्, ०४४ वर्षे कार्यवाहिका चालन विस्मरणान्निरुद्धम्, पुनर्धावने ०४५।३।१५ गते मन्त्रीपरिषद सचिवालय निर्णयेन स्थायीव्यवस्थां विधाय भूमिसुधार तथा व्यवस्था मन्त्रालय राजकोष विभागतो वर्ष द्वयस्यैव पूजाव्यय अ. खा. कोषत आदातव्य इति ०४६।१२।१४ दिवसे स्थानीय प्रधान पंचं संवोध्य पत्रं पारितम्, इत्थं वि. सं. १६६९ वर्षात् २०१५ पर्यन्तं राजाऽधिकार प्रचलिता श्री दुर्गापूजा ०१६ तः राजस्व संलग्नतया वैधानिक विच्छेदेऽस्माभिः सहयोग द्वाराऽविच्छिन्न धारिता ०४५ वि. वर्षात् श्री ५ राजकोष येनैव पुनश्चालयितुं कृतो मम प्रयासः पूर्वपुरुष यशश्च श्रीदुर्गा कुलदेव्याशीर्वादतः सफली भूतोऽस्ति । अस्मिन्कार्येऽपि हेमराज भेषराज भ्रातरौ पूर्णसहयोगिना वास्ताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमहं विद्यालश यस्य भूमेरनुत्पादक भागस्य विक्रय वितरणाय श्री शिक्षा मन्त्रालय स्वीकृति प्राप्तै एवं विद्यालय स्मारिका, पत्र संपादन प्रकाशन कार्यमादाय काष्ठमण्डपे जेष्ठ पुत्र निवासे स्थितस्तत्सहयोगेनैव कार्य सिद्धि कुर्वन्नस्मि । मम षड् पुत्राः-तुलसीदास, मोहन, रामचन्द्र, प्रमोद, नेमेध सुश्रवाः पुत्रीचैका प्रज्ञा प्रज्ञा मरासिनी (श्री महापण्डित दधिराम गुरोः पौत्रवधू सन्ति, किन्त्वेतेषां माता द्विवङ्गताऽस्तीति विधुरोऽहं श्रीरामेच्छायां सन्तुष्टः सानन्दश्च जीवनं व्यतीयामि ।

नारायणः

वालाराम जीवनी

खिदीम पोखराथोक निवासिनः श्री नीलकंठस्य प्रथमः पुत्रो वालाराम गौतमः वि. सं. २००२ वर्षे ऽजनिष्ट, ०४ वर्षे शीतलावेध प्रकोपेन तस्य द्व एव चक्षुषी विकृते, तथापि समये सः स्वप्राङ्गण संयुक्तं श्री हरिहर संस्कृत पाठशाला सन्निध्यं प्राप्य चण्डीं, वेदं, व्याकरण काव्य कोषादि विषयाञ्छ्रुति मात्रेण कण्ठस्थान-करोत् विद्यार्थीप्रिय स्तानभ्यासधन् स्वश्रुतं सर्वं हृदये दृढीकृतवान्, ०६२ वर्षे श्री ह. सं. माः पा. स्वीकृतेः पश्चा-दपि ब्रह्मचर्यमखण्डितं सन्धारयन् सोऽस्मभ्यः सर्वाऽध्यापकेभ्यःपिशुपालवध-किरातार्जुनीय- रघुवंश- नैषध- रामायण-गीता वैयाकरण भूषणसार- पातंजलमहाभाष्य- वेदान्त- मनुस्मृति- धर्मशास्त्रादि विषयाङ्ब्रह्मचर्य प्रति भया त्रिवारं श्रुत्वा कण्ठस्थीकृतवान् ।

विद्यालयस्य तथा समाजस्य जन्ममृत्यु राजनीत्यादि घटनायाः, वहिस्त आगतस्य विशिष्टातिथेः स-समय कृतस्य वक्तव्यस्य च मानसिकेऽभिलेखे यथार्थं धारयन्, रेडियो यन्त्रं कदा किं कथितवदिति विवरणं च सतथ्यं प्रस्तौति, दशवर्षपूर्वं नाडीस्पृष्टस्य सप्त पदीन भूतस्य जनस्य स्पर्श गन्धेन स्वराऽभिस्मरणेन च परिचयं ददाति, ०४२ वत्सरे स्वपित्रा जनकपुरं नीतोऽसौ वर्षपर्यन्तं भक्त सन्त साधुजनेभ्यः संगतिं विधाय नारायणी पश्चिमतटे श्रीवैष्णव वेदाश्रम पाठशालायां स्वयं सनातन सम्प्रदाय स्थितो व्याकरणाऽध्या पकत्वेनदृतः श्रुतिधरः प्रज्ञाचक्षुश्च सर्वै रभिमतः सुखंसानन्दं श्री रामेच्छायां सन्तुष्टो वर्तते ।

संपादकः

स्वदेशी तथा विदेशी रेडिमेड सामानको थोक तथा खुद्राको लागी
अवश्य सम्पर्क राख्नुहोस ।

सुरेश इम्पोरियम
नारायणगढ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खिदीम र तूदीम्

वासुदेव मरासिनी
पोखराथोक वडा नं. ५
पिपलडांडा

महर्षि पाणिनिको जन्म स्थान शलातुर ग्राम हो । उनको तपस्थली तूदी अधित्यका हो जुन क्षेत्र अहिले लुम्बिनि क्षेत्र अन्तर्गत अर्घाखाँची जिल्लाको महाभारत पर्वत श्रृङखलाको नर्तनाचल खण्डमा पर्दछ । यसै गरी पाणिनीय शब्दनुशासन अष्टाध्यायीको परीक्षण स्थल पाटलि पुत्र हो । पाणिनिको विषयमा यो तीन कुरा किंवदन्तीका रूपमा चर्चित छन् । उत्कीर्ण र अभिलेख साक्ष्य फेला नपर्दा यी उपर्युक्त कुराहरूलाई किंवदन्तीकै रूपमा भए पनि मान्नु पर्दछ ।

तूदी अधित्यकालाई पाणिनि तपोभूमि भनिन्छ । त्यसको सेरोफेरोमा जन जिब्रोमा अभ्यस्त तुदीं भन्ने खिदीम र पणेना नै पाणिनि तपोभूमिको परिवर्तित रूप हो भन्ने विद्वानहरूको दावी छ ।

प्रस्तुत लेखकको प्रारम्भिक अध्ययन स्थल मात्र होइन जन्म स्थल पनि खिदीम हो । यसले सानो छंदा अध्ययन गर्दा सुने गुनेका किंवदन्तीका आधारमा अहिलेको खिदीम नै पाणिनिका अष्टाध्यायी सूत्रमा उनको जन्मस्थल "शलातुर" एवं उल्लिखित तूदी ग्राम व्याकरणविद्या प्राप्ततप: स्थल भन्ने ठम्याउन खोज्दछ ।

हरिहर संस्कृत पाठशालाको अध्ययन कार्य गभर्नमेण्ट संस्कृत कालेज वनारसको पाठयक्रमको आधारमा 'मध्यमा' परीक्षामा सम्मिलित गराउन परीक्षार्थी तयार पारी काशीमा जाँचमा सम्मिलित गराउने व्यवस्था पनि रहेबाट परीक्षा पास गर्ने मौका पनि प्राप्त थियो । पछि खिदीम रहेको यो व्यवस्था चल्न नसकी त्यहाँ पढने विद्यार्थी अलपत्र नपरुन् र मध्यमा परीक्षामा सम्मिलित हुने मौका पाउन भनि स्व. हरिहरले प्रथम स्तरको अध्ययन पूरागरी जाँच उत्तीर्ण हुने विद्यार्थीको लागि गभर्नमेण्ट संस्कृत कलेज वनारस बाट स्वीकृत 'हरिहर संस्कृत माध्यामिक विद्यालयको' स्थापना काशीमा गरिदिनु भएको थियो । यो विद्यालय मङ्गल गौरी स्थित बालाजी मन्दिरको तल्लो तलामा धेरै वर्ष सम्म चल्यो । विद्यालय व्यवस्थापनका लागि पण्डित दामोदर भट्टराई रहनु भएको थियो । उहाँ विद्यालयका व्यवस्थापक मात्र नभएर परदेशमा पढन गएका विद्यार्थीले अभिभावक समेत मान्दथे ।

विद्यालयमा वेद र व्याकरणको अध्ययन हुन्थ्यो । पण्डित दामोदरले वेद पढाउनु हुन्थ्यो र पं श्रीकृष्ण-मणि त्रिपाठीज्यूले व्याकरण र अरु अङ्गशास्त्र पढाउनु हुन्थ्यो । विद्यालयमा वस्ने व्यवस्थाको साथै छात्रवृत्तिको पनि व्यवस्था पनि थियो । अधिकांश विद्यार्थीहरू विद्यालयमा रहन्थे भने केहीले वाहिर डेरा लीई त्यहाँ पढने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पनि गर्थे । केहीले हरिज्यूको काठमाडौं डिल्ली वजार स्थित घरमा वसि अध्ययन गर्ने मौका पाएको पनि बुझिन्छ ।

हरिहर विद्यालयमा अध्ययन गर्ने कतिपय व्यक्तिहरू आज नेपालको राजनितीक सामाजिक क्षेत्रको अगुवाको रुपमा चिनिनु भएको छ भने शैक्षिक प्रशासनिक र वैज्ञानिक क्षेत्रमा पनि कैयन कार्यरत रहनु भएको छ । यस प्रकार हरिहर विद्यालयले आधुनिक नेपालको निर्माणको लागि योगदान पुऱ्याएको छ भन्नुमा अत्युक्ति हुनेछैन ।

लेखक पनि केही समय हरिहर संस्कृत माध्यमिक विद्यालय वनारसको छात्र थिए । मेरो प्राथमिक स्तरको संस्कृतको अध्ययन घर मान्कोटमा भानिज दाजु पं नारायण गौतम (प्रधानाध्यापक हरिहर संस्कृत माध्यामिक विद्यालय) को अध्यापनमा भएको थियो । हरिहरज्यूका सहृदय पं टेकराज उपाध्यायवाट मान्कोटमा स्थापित छाप पाठशालामा पनि उहाँसंगै केही समय पढेको हुं । सोही वेला दाजि स्थानेश्वर प्रारम्भिक स्तरको अंग्रेजी अध्ययन पनि गरेको थिएं । २०१२ सालमा मेरा वा स्व. शिवप्रसादउपाध्यायले मलाई अध्ययनको लागि वाहिर पठाउने कुरा गर्नु हुन्थ्यो र के पठाउन उचित होला भनि सल्लाह माग्ने पनि गर्नु हुन्थ्यो। वर्दियामा वाको हरिहरज्यू संग भेट भएछ 'छोरालाई संस्कृत पढाउनुपर्छ' खिदिम पाठशालामा गें जाँचदिन लगाउनु पास भएमा वनारस पठाइ दिनु, दामोदर पण्डितजीलाई खबर पठाइ दिन्छु भन्नु भएछ र मैले खबर पाइ अरू विद्यार्थी संगै वार्षिक परिक्षामा सम्मिलित भै परिक्षा उत्तीर्ण गरि हरिहर संस्कृत माध्यामिक विद्यालय वनारसमा रही 'पूर्व मध्यमा' परीक्षा उत्तीर्ण गरेको हुं । पाठ्यक्रममा अंजेजी पनि वैकल्पिक विषय थियो । यो परीक्षा उत्तीर्ण गरेपछि अंग्रेजी तर्फको 'म्याट्रिक' सरह पनि हुने भएकाले म केशव अर्याल पर्शुराम समेतले एकै साथ परीक्षा दिएका थियौं । हामीले संस्कृत अध्ययनको साथै अंग्रेजी पनि पढ्ने गरेको जानकारी भए पछि श्री हरिहरज्यूले उहांको पाठशालामा रही अंग्रेजी पढ्नु उहांको संकल्प विपरित हुने कुरा पं. दामोदरज्यूबाट थाहा पायौं र विद्यालय छाडी आफ्नो अध्ययन पूरा गऱ्यौं । हामि पछिका त्यहाँ अध्ययन गर्ने कैयन साथीले सँस्कृतको साथै अंग्रेजीको अध्ययन पनि जारी नै राख्नु भएछ । ती व्यक्तिहरू शैक्षिक र प्रशासनिक क्षेत्रमा मात्र होइन तकनिकी क्षेत्रमा पनि कतिपय कार्यरत हुनुहुन्छ ।

२०२२ सालमा जागिरको सिलसिलामा म नेपालगञ्जमा थिए । श्री हरिहरज्यूको वेहावसान भएछ । विष्णुहरि र लक्ष्मीहरि क्रिया वसेका वखत भेट्न जांदा विद्यालयको प्रसङ्ग आयो । वर्ष दिन देखि विद्यालयको व्यवस्थापन टुटेको रहेछ । प्रशस्त जग्गा जमीनको स्वामित्व भएका हरिहरले विद्यालयका नाउँमा जग्गा नछुट्याइ आफ्नै नाउँमा राखी आयस्तावाट विद्यालय सञ्चालन गर्दै आउनु भएकोमा २०२१ सालमा वर्दिया जील्लामा भूमि सुधार लागु हुँदा हदवन्दी कार्यान्वियन भएवाट तेसो हुन गएको बुझियो । खिदिमका स्थानीय शिक्षानुरागीहरू पनि यत्रो योगदान पुऱ्याई आएको विद्यालयलाई ढल्न दिन हुँदैन सबैको सहयोगले चलाउनु पर्छ भन्ने सल्लाहमै स्वयं सेवकको रूपमा पं नारायण गौतमले अध्यापन शुरु गरेपछि विद्यालय सञ्चालन शुरु भएको रहेछ । पं नारायण गौतम विद्यालय सम्वन्धी व्यवस्था वारे वुझन विष्णुहरि लक्ष्मीहरिलाई भेटन नेपालगञ्ज आएका वखत म संग भेट हुनु पनि स्वाभाविक थियो । दुवैजना भेट्न गयौं र वेली विस्तार गरियो । उहाँहरूले विद्यालयका नाउँमा कुनै जग्गा दर्ता नरहेको वुवा (स्व. हरिहर) ले विभिन्न मौजाको आयस्तावाट विद्यालय चलाउँदै आउनु भएको जानकारी गराउनु भयो । विद्यालय सञ्चालनको लागि छुट्याएको जग्गा भनि भूमि सुधारमा लगत दिएको भए जग्गा कायम हुन सक्ने व्यवस्था थियो भन्दा यस्तो जानकारी भएन, सम्पूर्ण जग्गा उहाँहरूकै नाउँमा नामनक्सा दर्ता भै सकेकाले वर्दियाको जग्गा विद्यालयका नाउँमा कायम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुन सक्ने अवस्था देखिएन । तौलिहवा जिल्लामा नापी नभैसकेको वठनपुराको ६८ विघाहा जग्गा छ । विद्यालयका नाउँमा दर्ता हुन सक्ने भए सञ्चालनको लागि दिन्छौ । विद्यालय बुवाकै नाउँबाट सञ्चालन गरियोस् भन्ने आशय प्रकट गरेकाले पं नारायण गौतमज्यू शिक्षा मन्त्रालयमा आइ विद्यालय रजिष्टर्ड गराई दाताहरूले दिएको जग्गा पनि विद्यालयका नाउँमा दर्ता हुन सक्यो । स्थानीय विद्यानुरागीको सहयोग विष्णुहरि लक्ष्मीहरिको उदारता पं नारायण गौतमज्यूको प्रयासबाट ढुलमूल स्थितिमा पुगिसकेको हरिहर संस्कृत विद्यालय मूर्तरुपमा पुनर्शिक्षा प्रसारमा सेबारत हुन सकेको मलाई लागेको छ ।

यो विद्यालयमा संस्कृत प्रधान विषयको मात्र अध्यापन हुने गरेको र स्थानीय शिक्षानुरागी समाज सेवीको प्रयासबाट अंग्रेजी प्रधानता रहेको वेग्लै श्री राम विद्यालय हाइस्कूल लाई पनि यसै विद्यालयमा एकीकरण गरी श्री हरिहर संस्कृत साधारण माध्यमिक विद्यालयको नाउँबाट सुव्यवस्थित रुपमा आज सञ्चालन भएको देख्न पाउनु हर्षको विषय हो । गाउँ ठाउँमा विभिन्न स्तरका विद्यालय क्याम्पस हरू स्थापना हुँदै गरेको सन्दर्भमा हिजोको हरिहर संस्कृत पाठशालाबाट पाएको योगदानमा भिन्नता रहेता पनि स्थानीय बाल-बालिकाको उज्यालो भविष्य आज पनि तेसैमा निहित छ । स्व० हरिहरलाई अमरत्व पनि प्रदान गरेको छ । लामो समय देखि शैक्षिक क्षेत्रमा योगदान पुऱ्याइ आएको हरिहर विद्यालयलाई विद्यानुरागी शिक्षाप्रेमी समस्त महानुभावको साथै हामी सबैको सेवा पुऱ्याउनु कर्तव्य ठान्दछु । अन्तमा विद्यालयको प्रगतिको शुभ-कामना व्यक्त गर्दछु ।

ज्ञातव्यः— यसका लेखकले आफ्ना पिताज्यू र हरिहरको राम्रो वसाउठी भएको र आफै नेपालगञ्का भू०सु० अधिकारी भएको प्रभावकारिताले विष्णुहरि लक्ष्मीहरिद्वारा पाठशालालाई जग्गा दिलाउन नैतिक उपाय र प्रदान गरिसकेपछि काठमाडौंको भू०सु० विभाग फिल्ड कार्यक्रम समन्वय शाखाबाट हदवन्दी नलगाई स्वीकृति गराई दिन प्र०अ० लाई चाहिए जति मद्दत र सुविधापनि दिनु भएको थियो।

संपादक

परिशिष्टेतिहासः

श्री हरिहर व्ययेन पाठशाला सञ्चालकाः कर्मचारीणस्तेषां प्रथमो मु० गोविन्द प्रसादः श्री प्रधान गुरु निर्देशनेगुरुणा मावासादि संपूर्ण व्यवस्थां छात्रावासार्थे शुद्धघृत-सूप-व्यंजन वार्षिक परिधानादि क्रय्य संकलनं च कुर्वन् श्री गुरवे यथार्थाय व्ययं दर्शयति, स्वकीयं मुखियाकार्यं भारमपि वहन् प्रायशो वेदाऽध्ययन स्थाने स्थिरी भूय ६५ जनैरेक स्वरेण पाठ्यमानं वेद ध्वनि ध्यानेन श्रृणोति. वेदपाठे नेपाली भाषायां घृणितार्थाः शब्दा यदागच्छन्ति तदा गुरुणासह परीहासं करोति, कदाचिदगुरुप्रेरणया ऽस्माकं वैदिक लीपि समलेखं दृष्ट्वा अये ! विद्यार्थिनः ! यूयमक्षराणि लिखथः । परं वयं क्षरं लिखाम इति स्ववेदनां प्रकटयन् सरलः शान्तमूर्तिश्च छात्राणां मनांसि रंजयतिस्म तेनैव खिदीमे प्रथम भङ्गुली वाद्यं (हार्मोनियम) आनीय रसिकाः संगी तानुकारिणः कृताः, एकदा पुनः स्वव्ययेनैव वाङ्गला खेंडीतो भैरव नाटच माहूय सर्वानस्मान् ग्रामीणांश्च दर्शयामास ।

गोविन्द समयान्तरं हरिहरस्यैव पितृव्य भ्राता शालिग्रामगौतमः पूर्वोक्तं कार्यं गुणस्तरेण संचालयन् छात्रोपरिमधुर व्यवहारेण सर्वप्रियो (माइल्वा) इतिकथ्यते, कदाचिद्गुणस्तर सामग्री संकलने यदि द्वित्राणि रूप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काण्यधिव्ययन्ते तदा श्री गुरूणा भर्त्सितोऽपि छात्रकृते तत्कृतं सत्यं न मदर्थमित्युत्तरयन गुरूमनुनयतिस्म तस्यत्रयः पुत्रा स्तद्धर्मेणैव सुयोग्यास्तेषां ज्येष्ठो माधवराजः संस्कृत विद्या वारिधिमवगाह्य श्रीम.सं.वि. विद्यालयस्य कूलसचिवत्वेन कार्यभारं संचालयति, मध्यमो यंत्रकुशलः (इंजिनीयरः) कनिष्ठो विज्ञान स्नातक कक्षां पठति, अत इयं सूक्तिः सार्थिका यत्–सत्येन लक्ष्मी धर्मेण पुत्राः– इति

तदुत्तरकाले पूर्वोक्त सर्वकार्य निर्वाहाय सन्नियुक्तो देवनाथ गौतमश्छात्राणां सखाइव प्रियः सपरिच्छदां पाठशालां मार्गे शकट मार्गें रेलमार्गें च वहुयत्नेन संरक्षन् वर्दिया वन्धु श्रीं नीतवान । तस्यैव पितृगृहे छात्राऽवास आसीत्, सःप्रायश : समयादेव जनकपुरे धारापानी क्षेत्रे स्ववन्धु पुत्र बुद्धिनाथ-श्यामनाथ – केशवादिभिः सह सुखं समृद्धो जनप्रियश्च भूत्वा वसन्नपि पितृपितामहादिजन्म भूमिं खिदीमं छात्रसेवकमिषेण द्विन्नाणि वर्षाण्यध्युष्य जनकपुरमेव गतो दिवङ्गतश्च – तस्य पुत्र भ्रातृजा स्तत्रैव सन्ति ।

तत्पश्चात् गुरूवर्य श्यालक, आकंदिमामा पूर्ववत् सर्वां पाठशाला व्यवस्थितिं हरिहर गृहव्यवहारं च संभालयन् सूनृत भाषितया छात्राणामधिक स्निग्ध आसीत्, तस्य कार्यकाले प्रचलित पाठशाला भवनं, श्री दुर्गा मन्दिरं (दशैंघर) काष्ठाटी, ज्योतिषी–दुल्ल भयोश्च गृहगोष्ठानि वह्निदग्धानि, तत्समाचारः श्री हरिहरः सर्वेषा मार्थिक साहाय्यं वर्दियातः प्रेषयन् धनञ्जयं श्रीगुरूपुत्रं पत्रेण संवोध्य वह्निदाह सुरक्षितं जतुच्छदिकं पाठशाला भवनं निर्मातुं आदिदेश, तस्यार्थिक निर्देशने ,मामा, सर्वनिर्माण कर्मकर संयोजनं काष्ठपाषाणादि कुद्दाल खनित्र कुठार क्रकज वृश्चन जतुपत्रान्न सूप व्यंजन तक्र लवण मरीचाद्युपस्कर संकलनं च कुर्वन् मासत्रये समये भव्यं भवनं स्थिरीकृतवान् यदिदानीं श्री ह. सं. सा. मा. विद्यालयस्य प्रमुखमैतिहासिक भवनमस्ति

एतान्क्रमशः परिवर्तमाना नप्यन्तः संचालयन्ती हरिहर पितृव्याऽवीरा (राइली वज्यै) सर्वान् गुरूवर्ग-विद्यार्थीगणान् कर्मकर समूहांश्च मातृवत्रिनह्यती तेषां भोजनशाक सूपपानीय घृतेषु निर्वीजतुष कीट पलङ्ग तीक्ष्ण हृशा परिशोधयन्ती शुद्ध भोजन व्यवस्थांप्रति सदा संलग्न विवेका हितैषिणी चासीत्, वदतिच स्वमुखेनैव स्पष्टं यत्:– यस्मै कस्मैच्चिद्यदि भोजनं दीयते तत्र तुप कीटाद्य शुद्धि स्तद्विषतुल्यं पाप संचयकारी, यदि तत्र संशुद्दिः सोऽमृतक ल्पो धर्महेतुरिति सदा तद्विचारे निमग्ना स्वकीय सुख विलास विश्रमादीन्विस्मृत्य स्वधर्म चेष्टायां जागर्तिस्म, समये तस्या निधनमूर्द्ध गतिकमभूदिति किं वादिनो वर्तन्ते ।

एतेषां समेषां परम सेवको रामसिङ् क्षत्रियः सपरिवारो निष्कपटः शुद्धवुद्धिश्चासीत्, स, काष्ठमंडपजन्माऽपि सु. पीताम्वरगौतमेन खिदीम स्वगृहरक्षार्यै नीतो वह्नु वत्सरान् स्वधर्मव्यतीतान्कृत्वा ०९४ पाठशाला संस्थापनकाल एव पाकशालाया जलवहन - भाण्डमार्जन – महानसलिपन – पीठप्रक्षालनादि सेवा धर्मे सन्नियुक्तः प्रातः ६ सायं ४ होरासमये अंगुलीभ्यां कर्णौ पिधाय हे !!! विद्यार्थी वाजे हो !!!! भोजनकालः संजात इत्युच्चै स्त्रिवारमाह्वयति, पूर्णदिवसं स्वकार्यरतोऽपि समीपस्थवेदपठनं श्रुत्वा कंचित्समग्रं कांश्चित्त्रुटितान्मन्त्रान्स्वेच्छया गायमानः कार्यभारं लघिष्टं करोति, वहून् गताऽगतांश्चछात्रान्निर्वैराग्यं सेवमानो न कस्मैचिद्द्रुह्यति क्रुध्यति रिष्यतिच, एवं सदा सहनशीलो मृदुभाषी सत्सेवकः सर्वप्रियः सो भूत्वाऽपि दिवङ्गत एव भवेत् ।

सर्वं हरिहरस्य मध्यदेश – खिदीमाऽयव्ययौ गणयमानो महालेखापालः सूर्यप्रसाद मान्कोटेय पितामहः कोशलेश्वर शर्मा सार्धं खिदीमागत आसीत् , एदा वार्षिक परीक्षायामुच्चै (८०%) रङ्कं प्राप्नुवद्भ्यश्छात्रेभ्यः पारितोषिक वितरण समये सः कोशलेश्वरः शिरोवेष्टितो ष्णीषकर्णान्तराल स्यूत लेखन्यालम्वश्मश्रूभ्यां च जटिलदृश्यःस मूर्धकंपं (श्रीहरिहरस्य जय! उच्यताम्) इति वदतिस्म, हरिहरोपि प्रियहितैषिणं तं सोत्प्रास सस्मितं ,,धदुल्लूक ! श्रीसरस्वत्या गुरूणां च जय उच्चार्येत – परन्तु न ममेति सानुरोधमभर्त्सयत्, ततस्तेनाऽभिमताः सर्वे सकरध्वनिं श्री सरस्वत्या गरूणांच जय ! इत्युच्चै रघोषयन् । इत्थं द्वावेव परीहासाचार्यौ सर्वाल्हादकावास्ताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभिन्न समयेषु, अनिरूद्धपिता वल्कोटेय (कलकत्ता नेपालो सैनिक गुरू पुरोहितः) मित्रलालपिता धरेनीयः (सदिया ने.सै.गु.) रामकृष्ण पिता काश्कीपोखरेय (दार्जलिङ ने.सै.गु.) श्चैते स्वस्वपुत्र पठन प्रवेशायाऽगताः स्व स्व सैनिक क्रीडा व्यायामादि प्रदर्शनं कृत्वाऽस्माकं सोत्कण्ठानि मनांस्यर ञ्जयन् ।

तथैव योगी नरहरिनाथस्य पंचदैनिकी शास्त्रार्थ चर्चा दण्डीस्वामिन श्चातुर्मासिकी योगसंगतिः, श्री घन श्याम गुरोर्मित्रलाल ,प्रपितामह, हुतराम गौतमस्य श्चसंयुक्ताऽयुर्वेदिकी गोष्ठीच समेषां छात्र–ग्रामीणानां हितैषिण्यो ज्ञान योग स्वास्थ्य लाभदायिन्योऽभूवन् ।

२००७ वैक्रमांब्दे श्री राजाप्रजयोः संयुक्त प्रयासतो राजधानीसहित नेपालाऽधिराज्ये प्रथमा प्रजातान्त्रिकी पताकाऽन्दोलिता चेत् ०६ वैशाख एव खिदिम दुर्गामन्दिर – संस्कृत पाठशाला प्राङ्गणे ,दशैघर चत्वरे, स्व काशीनाथ गौतमनेत्राः खिदीमेलीयाः श्री घनश्याम पौडयाल गुरोरध्यक्षतायां प्रजातान्त्रिकी सभां संगठित्वा चतुस्ताराङ्कित ध्वजां समुच्द्धूनयन्तो जनमनोत्तेजकानि भाषणानि श्रावयन्तिस्म, तत्प्रसङ्गे पृष्टपोषकैः संसूचिता राणा सैनिकाः समागत्य तान् विघटित वन्तो भर्त्सयन्ति स्म, प्रमुख नेता काशीनाथः पत्र पत्रिकाः पताका मुद्रणयन्त्रं, च चीसापानी वनभूमौ गोपयित्वा स्वयं पलाय्य भारतं प्रविष्टः प्रजातन्त्र प्राप्त्यै विशेष सन्नद्धः गंगा प्रसादः (मदनकुमारे तिनाम परिवर्तनं कृत्वा काशीं प्राप्त उच्चैरध्यैष्ट, रोहिणीप्रसाद–पीताम्बर गौतमौ चिरंजीविघिमिरे, नेत्रप्रसाद मान्कोटेयः, वहादुरे थापा, सहकटु वालः सेते पेटे सूचीकार श्चैते कारागारै निगडिताः सेते सूचीकार आमडाडेयो जनतायोजक दोषेण सैनिकै भृशं भर्त्सितो गलपाशेन लंवित्वा मृत एव, घनश्याम गुरू डाँडाकठेरी निवासात् निर्वासित आसन् ।

०१५ मार्गे तत्रैव चत्वरे भरतमणि, भानुभक्त, पीताम्वर, इन्द्रमणि, चिरंजीवि, नागेन्द्र, खुमानन्द, मणिराम प्रमुखाः जनाः श्री बुद्धिनाथ पटवारिण अध्यक्षतायां सभा समितिं गठित्वा स्वावश्यकतानुसारं श्रीराम विद्यालय मिडिल स्कूलं संस्थापयन्तोऽभूतपूर्वो हरिजन शिक्षाप्रवेशोऽपि, अध्यक्षद्वारैवोद्घाटितः, अहमपि तत्र सप्रध्यापको नियुक्तो निःसंकोचं सर्वपाठयं पाठायतुं प्रवृत्तः, पंचषडदिनेषु कार्यवशात्तमघासं गत्वा प्रत्यागतः पश्यामियत् – पिप्पलादि वृक्षेषु हरिजन शिक्षा विरोधिन्यः सूचनाः संलग्नाः, प्र.अ. माधवराज अर्यालः स.अ. नागेन्द्रनाथ गौतमश्च, स्कूलं पिधाय औषध्यर्थं तान्सेनं गतौ, अहन्तु भद्रजनैर्मुखेनैव स्मारितोयदि तत्कार्याद्विरन्तुं शक्तः परन्तु ममपरोक्षे पत्रसूचनाभिः समयगति रून्धन्तं व्यवहारं दृष्ट्वा हृदयतलादेवोद्भूत साहसपूर्णात्मवलेन तस्य प्रतिशोधाय श्वोदिन एव तत्तवृक्षेषु प्रतिस्पर्द्धोत्तरपत्रं लगयन् स्कूलं पुनरूद्घाटित वानस्मि । एवं चतुः पंचवार पत्रोत्तर प्रत्युत्तर सघर्षे जाते मां छात्रैर्वेष्टयित्वा भद्रगुरवोऽकथयन्यत् हरिजन शिक्षणं त्यजसि चे त्त्वमस्मदीय एवासि, अन्यथा धर्मसभामाहूय तव मर्यादा भंगं करिष्यामहे, अहमपि किंचिद्विचार्यैव निर्भीको निरात्मग्लानश्च यत्कर्तुं शन्कु थ स्त त्कुरूथ, मयातु निरक्षरेभ्योऽज्ञानं दातुं प्र यत्यत एव, सत्यं पौष द्वितीयेऽह्नि पाठशालाप्राङ्गणे पीतध्वजाः समुद्धूय धर्मसभा गठिता, यत्र खिदीमेलीयास्तु प्राय आयोजका एव, अन्येपि परितः सहस्त्रशो विदुष आहूय स्कूलप क्षीयाणां(वहुशः स्वव्यवहाराय मधप्रदेशादिकं गत्ता आसन्, अवशिष्टानां अस्माकं भोजन पानीय यज्ञ वृत गुरू पुरोहिताश्च रोधयन्त आगामिनि माघे श्री ५ राज्ञो रिडीभ्रमणे विनतिं कृत्वा एतत्कार्यं समूलमुच्छेदयितुं निर्णायका आसन्, अस्माभिस्तु प्रथमं राजादेशः पुनर्व्यासस्य स्त्री शूद्रकृते महाभारत ग्रन्थ प्रणयनं, द्रोणाचार्यस्य निषाद (शूद्र) गुरूत्व स्वीकारः, शंकराचार्यस्याऽच्चर्मकारजाते हिन्दुत्वो पदेशं चप्रमाण कोटौ संस्थाप्य, अक्षर मात्र शिक्षाप्रदाने आत्मान मविर्गहयन्द्धि नैतत्का र्यं द्विचलिप्यते इति दृढं प्रत्युत्तरिताः– परिणामे न राजत उच्छेदः, नास्माकं भोजनादिनिरोद्धं कश्चिदपि प्रावर्तत इति वयं सफल संघर्षा श्चभूम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठशाला समीपे छात्राऽवास प्रतीक्षार्थिनां भोजनादि सौविध्यदात्री ज्योतिषीवृद्धमाता सर्वदा प्रसन्न मुखी प्रत्येकेषां भाँडेपु नैक विधानि तण्डुलाट्ट गोधूम कोद्रव पक्कानि सतेवन दुग्ध दधि तक्र भोजनानि सज्जी कुर्वती न कदाचिद्विरज्यते कुप्यति मुह्यति च ते स्वस्व भाण्डेभ्य भोजनानि प्रसृत्य खादन्ति पुनः पठितु मेव गच्छन्ति वराकी वृद्धा स्वव्यवहाराऽवलोकन पूर्वकं पूर्णदिवसं तेषां भांडानि मार्जयति पानीयमानयति चुल्लींलिपति सायमर्थे दारू शाकादि संचयं च कुरुते, पारिश्रमिक विषये स्वयं नकिंचिद्वदति दयालवः स्वसंभलभुजो मासिकं पंचषट्, तच्छं वलभोक्तार स्त्रयोदश चतुर्दशं वा ददाति, सर्वदैव संतुष्टा छात्र हितैषिणी सा सर्वेषां धर्ममाताऽसीत्, परन्तु तेषां संगतावपि तस्याः कनिष्टपुत्रो निरक्षरो नमूको नचतुरो जडभरतइव सर्वपरिस्थितितुष्टो व्यङ्ग हास्य चतुरो गाश्चार-यन् कति सन्तीति प्रश्ने काली माली फुर्की टुटी वसन्ते गोपाले तीखे डल्ले, इत्यादि नामान्युच्चरति न दश द्वादशेति संख्यां प्रयुनक्ति तस्यपुत्राः समुपार्जन मार्गलग्ना गृह संपन्नतां वर्धयन्ति ।

एतादृश वहिश्छात्रोपकारिण्यो ग्रामे पुतलीदीदी, मति ओडारे दिदी, राइली भट्टराइनी, राइली पोड्याल्नी विशेषतः पोखरा भानुभक्त माता ज्यामिरपाटा जर्नादन पितामही (या हरिहस्यैव पितृव्या) एते स्वशत्त्य नुसारं द्वित्राणां स्वसंबन्धि वन्धु वान्धवच्छात्राणां प्रायो निःशुल्क सौविध्यंचसाधयन्त्यो हरिहर पाठशाला साहाय्यं विदधते, तत्र निम्वु नारंगी शाकादिकंतु सर्वेऽपि ददन्ति ग्राम्याः ।

पाठशाला प्राङ्गण दक्षिणे सर्वसमीपे श्री नीलराज पितामहो वाटिका स्थितानि निगाली लेखन्यो, वंशपत्राणि, स्वयं ग्राम जिमावालः करविनयनाय वाग्लुङ्गं गत्वा कर्गजमानीयच्छात्रेभ्यो वितरन् समूद्धोंद्धूननं सुन्दराक्षर लेखनाय समर्मवोध पठनाय च प्रोत्साह यतिस्म, एतस्यैव, पौत्रो वालारामः प्रज्ञाचक्षुः पाठशालाऽभि-लेखरत्रमेवदानीं नारायण धट्टे स्थितोऽपि चिरंजीव्यात् ।

एतस्या विद्यार्थिनः प्रायो दिवाऽवकासे ऋतु समयानुसारं विसूपाध्यायामराई वाटिकायामाम्राणि काशीनाथवाटचां कट्फलानि मैदान मार्ग दक्षिण वामे तेन्दुकानि मरूकोटे खिलुवा फल भक्षणायच सोत्कूर्दनं धावन्ति चेत्, अष्टमी प्रतिपदोर्व्रतविशेषेण चौराली मालिका दुर्वासागह्वर दहः सिद्धेश्वर मन्दिरेषु पूजा पाठादि शैक्षिक भ्रमणं कुर्वन्ति, साधनंवुट्टा जंबूफल भक्षणं दाङ्जासंगमे जलक्रीडां च विदधन्तोऽध्ययन परिश्रमं विस्मरन्ति हटिया मेवनाथः स्वयं तानाहूय सु. राधाकृष्ण वाटिकाया आम्रलीचिक फलानियथेच्छं भोजयति कार्यग्राम जयमङ्गल वाटिकायां राङ् भाङ् वृक्षोन्नति दृष्ट्वाऽश्चर्यं मन्व तेचेत् नारङ्गी लोहकाष्ठांऽफीफलान्यास्वादयन्तो मोदन्ते च, प्रतित्रयोदश्यामेक द्वौ वहवश्च केचिन्निष्कामाः कतिपये विद्याकामाः स्वेच्छया पाकशालापश्चिम मन्दिरे श्री सर-स्वती पूजन व्रतमेकविंशतिवार नियमेन स्तोत्र पाठंच निराहारा आचरन्ति प्रतिरामनवमी कृष्णाष्टमी शिवरात्री हरिशयनी-वोधिन्येकादशी तिथिपर्वसु हरिहर निर्देशानुसारं फलाहारं लभन्ते, गुरु पूर्णिमायां रूप्यकं संमेल्य शष्कुली तस्मै अपूप दधि व्यंजनादि संकलया विधिवद्द्रव्य रूपेण गुरूणां पूजनं कृत्वाऽशीर्वादां लभन्ते सभङ्ग भोजं कृत्व रमन्ते माद्यन्ति च,ऋषितर्पण्यां श्री दधिरामादि गुरूभिः संगत्य नदीतटे विशाल कूपे चगत्वा वैदिकीं श्रावणी गणस्नान ऋषिपूजन-तर्पण यग्योपवीत धारण रक्षावन्धनादिकीं संस्कृतिं संमानयन्ति-प्रतिप्रात भोजनादौ सर्वे रेकस्वरेण पुरूषसूक्त पठनमनिवार्यमासीत् एकदा हरिहरः षामासिक वेद मौखिक परीक्षा गतोत्तराय पूर्णाङ्को देयः, स्वरमात्रमपि विकरोति चे च्छून्यं लभ्येतेति नियमं स्थापयामास, तादृशेषु ५० पूर्णाङ्क पञ्चप्रश्नेपु गुल्ली-तौस निवासी लेखनाथ अर्यालःस-सर्पप्रश्नान्समादधौ, संस्थापकः स्वयं हरिहर स्तस्मै एकोत्तर पंचाशदङ्कं घोषयन् वेतस दण्डेन छत्रेण संमानयामास, इत्थं पूर्णाङ्काधिकं परीक्षा फलं विश्वस्मिन्नेव केनापि नलब्धभ् तन्नियमे-नानान्ये केचिच्चत्वारिंशत् त्रिंश द्विंशति दशमात्रं प्राप्नुवन्तः६५ छात्रेशु सप्त एव न्यूनाधिकाङ्कलाभान्विता बहुशः शून्यमात्रेण संतुष्टाः- छत्रोपानह पुस्तक लेखन्यश्च सर्वैर्लब्धाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीरामजी प्रसाद गुरूः प्रति रात्रौ होरात्रयं छात्रावासमागत्य प्रत्येकेषां पाठानि तीव्रं निरीक्षन्नज्ञात भागं परिमार्ष्ट्रि, स्वयं वैयाकरण भूषण सार पातंजल महाभाप्य ग्रन्थेषु यूक इव संलगति गुरौ निर्गते छात्राःशूत्र—श्लोकानामन्ताक्षरी प्रतियोगितया शास्त्रार्थेन च मनांसि रंजयन्तः स्वपन्ति ।

सँपादकः

श्री हरिहर सँस्कृत पाठशालाको मेरो अनुभव

दुर्गा प्रसाद गौतम

अनादिमध्यान्तमशेषमीढ्यं निष्पङ्क लेशं विमलप्रकाशम् ।
नै सर्गिका ज्ञानविज्ञात दक्षं गुरोः पदाम्भोजयुगं भजामः ।।१।।
"पाकस्य शाला सहिता विशाला
विराजते संस्कृत–पाठशाला ।।"

म जन्मनु भन्दा पहिले नै वि. संवत् १९९४ सालमा स्थापना भएको नेपालको पश्चिमाञ्चल लुम्बिनी अञ्चल रुरु क्षेत्र देखि ५ कोश पश्चिम खिदिम पोखराथोक सुरम्य स्थानमा स्थित श्री हरिहर संस्कृत पाठशालामा वि. सं. २००६ साल पौषशुक्ल तृतीया देखि २०१४ साल मार्ग शीर्ष महिनासम्म अध्ययन गरेको हुँ ।

मैले यहाँ अध्ययन गर्ने शुभारम्भ गरेको "ऋषिरुवाच" नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ।।

दुर्गा सप्तशती अ. १ श्लो. ६४ बाट हो । दुर्गा सप्तशती अध्ययन गर्दा मध्यगुरु श्री घनश्याम पौड्याल ज्यू सँग अध्ययन गर्दथें । ३ वर्षसम्म शुक्ल यजुर्वेद सम्पूर्ण कण्ठस्थ गरे पछि, मध्यकौमुदी व्याकरण, काव्यकोषादिको अध्ययन गर्न प्रारम्भ गरियो । मध्यगुरुसँग मध्यकौमुदी पञ्चसन्धि समाप्त गरेपछि वहाँको स्वर्गारोहण भयो । त्यसपछि हेडगुरु पं. श्री दधिराम मरासिनीज्यूका पुत्र श्री धनञ्जयज्यू सँग खिदिमको हरिहर संस्कृत पाठशालाको अध्ययन समाप्त गरी श्री गुरुवर पं. दधिरामज्यूको कृपाले काशी (भारतमा), अध्ययन गर्न जाने अवसर पाएँ र श्री हरिहर संस्कृत पाठशाला वालाजी मन्दिर मङ्गला गौरी वाराणसीबाट वाराणसेय संस्कृत विश्व विद्यालय (सम्पूर्णानन्द सं. वि. वि.) को मध्यमा परीक्षामा उत्तीर्ण भई वा. सं. वि. वि. बाट ३ आचार्य परीक्षा उत्तीर्ण गर्न सफल भएँ ।

यस पाठशालामा बाटा हिंड्ने बटुवाहरूले घण्टौं तक रल्ल परेर विद्यार्थीहरूले सस्वर वेद अध्ययन गरेको वेदध्वनि सुनी रहन्थे । मैले अध्ययन गर्दा विद्यार्थीहरुको संख्या लगभग १०० थियो ।

पाठशालामा अध्ययन गर्ने समयः— विहान १० बजे लगभगको समयमा गुरुबाट पाठ अध्ययन सुरू हुन्थ्यो र दिन भर अध्ययन चलि रहन्थ्यो जब सम्म पाकशालामा भोजन तयार भई "भान्सा भयो ३ विद्यार्थी बाजे हो ३" भन्ने शब्द हुँदैनथ्यो । तब सम्म यस विद्यालयमा 'क' देखि मध्यमा सम्मको पढाइ हुन्थ्यो । यहाँ दिएको परीक्षालाई काशीमा प्रथमा उत्तीर्ण गरेको मान्यता थियो । तर विद्यार्थीको योग्यता दाँज्ने हो भने त वहाँका शास्त्री परीक्षा उत्तीर्ण गरेका विद्यार्थीको भन्दा यहाँका विद्यार्थीको योग्यता बढी हुन्थ्यो । २००५ साल-भन्दा पहिले यस पाठशालामा वेद, व्याकरण, काव्य कोषादिको साथ साथ ज्योतिष विषयको पनि अध्ययन हुन्थ्यो । यो कुरा त्यस बेलाका प्रधानाध्यापक श्री टीकाराम मरासिनी ज्यूले नेपाली भाषामा लेख्नु भएका टीकाका सिद्धान्त-गणित ज्योतिषको करण ग्रन्थ "भास्वती" र गणित ग्रन्थ 'लीलावती' बाट अवगत हुन्छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस पाठशालामा हामीहरूले अध्ययन गर्दा वेद, व्याकरण, काव्यकोषादिको अध्ययन हुन्थ्यो । जुन विषय पढे पनि कण्ठस्थ गरेर राम्रोसँग बुझेर शंका समाधान गरेर मात्र पढाइ हुन्थ्यो । १५/१५ दिनमा गुरुहरूले पाक्षिक परीक्षा लिनुहुन्थ्यो । अनध्यायमा पढ्ने चलन थिएन । अनध्याय १, ८, १४, १६, ३० तिथिहरू हुन्—"अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी । प्रतिपद्धरते विद्यां चाष्टमी प्राणघातिका ।।१।। तथा "आ. का. पौ. चै. द्वितीयायां वेदाङ्गं नैव पाठयेत् ।। भन्ने नियमहरूको पालन गरी अध्ययन गर्ने चलन थियो । विद्यार्थीहरू ज्यादै अनुशासित थियौं । गुरुज्यूहरूलाई साष्टाङ्ग दण्डवत् प्रणाम गर्ने चलन थियो । आज भोलि जस्तो गुरुलाई सर् भन्ने र नमस्कार सम्म पनि नगर्ने चलन थिएन । गुरुको अनुशासन विना विद्वान् हुन सकिदैन । अतः विद्यार्थीहरू अनुशासनमा रहनु पर्छ । अनुशासनमा रही अध्ययन गर्ने छात्रले गुरुका असल गुणहरू लिन पाउँछ किन कि—"ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत इति ।

हामीहरू अन्य गुरुहरूसँग पाठ लिएर दिन भर पढेर अपराह्न तिर हेड गुरु पं. दधिराम मरासिनी ज्यूलाई साष्टाङ्ग दण्डवत् प्रणाम गर्न घुइचो लागेर गुरु कहाँ जान्थ्यौं । हेड गुरुज्यूबाट श्रुति, स्मृति, धर्मशास्त्रहरूको उपदेश ग्रहण गर्दथ्यौं ।

यो हरिहर संस्कृत पाठशालाको स्थापना भएको हेडगुरु पं. दधिराम मरासिनीज्यूको प्रेरणाबाट नै हो । यस विद्यालयमा अध्ययन गरेका हरिप्रसाद आचार्य तीर्थराज सुवेदी आदि धुरन्धर विद्वान्हरू हुनु हुन्छ । काशिनाथ गौतम, 'मोदनाथ प्रश्रित' ज्यूहरूले अध्ययन गरेको पनि यही हरिहर संस्कृत पाठशाला हो ।

यो पाठशालाको नयाँ शिक्षा योजना लागू हुँदा २०३१ साल पौष महिना देखि श्रीराम विद्यालय हाइस्कूल गाभिन गएकोले श्री "हरिहर संस्कृत तथा साधारण माध्यमिक विद्यालय" को नामाकरण गरिएको छ । यस विद्यालयको गत २०४४ साल पौष १ गते सुवर्ण जयन्ती समारोह मनाइयो । अब यस विद्यालयमा १०+२ कक्षा थप हुने प्रस्ताव पनि रहेको छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऐतिहासिकी गौतम वंशावली

ले. नारायण गौतम

ॐ तत्सवितुर्मण्डलस्थो नारायण जगत्प्रभूः
तस्यनाभेः समुद्भूतो ब्रह्मा लोकपितामहः ।१
तस्य ध्रुवः समुत्पन्न अत्रिर्ऋषिवरिष्ठ सः
तस्य गोत्रादि सन्तानो वर्णितोऽत्रप्रबन्धने ।२
श्रीराम गण्डशैलेभ्यः प्रस्तुता गण्डकीसरित्
शालग्रामीतथाकृष्णा मध्यनेपालवाहिनी ।३
अस्या एवपूर्वतीरे धवलश्रृङ्ग पर्वते
तपस्यमानो ब्रह्मर्षिरत्रिर्वेदाङ्ग पारगः ।४
अनसूया धर्मपत्नी पातिव्रत्य गुणाश्रिता
उभौतो भ्रममाणौ च दण्डकारण्यके वने ।५
श्रीसीता रामचन्द्रेण संगतौ विमलेन्द्रियौ
तेषामभून्नालापाः परस्परहितैषिणाम् ।६
स्वयं रामोऽत्रिवर्याच्च शिक्षितो जीवरक्षणे
अनसूया च सीतायै पतिव्रत्याऽशिषं ददौ ।७
तयोस्तुपुत्राः संजाता ब्रह्मविष्णुमहेश्वराः
अनसूया सती धर्मे पराजित-परीक्षकाः ।८
सोमोदत्तश्च दुर्वासा ब्रह्मतेजोऽभिषिचिताः
मनस्विनः सविद्याश्च गुणशीलसमन्विताः ।९
दुर्वाससःसमुत्पन्ना अत्रिगोत्रसमद्भवाः
गौतमा इति विख्याताः सिन्धमुश्चा निवासिनः ।१०
सहस्रशोवंशक्रमे निर्भयाश्च निराकुलाः
स्वधर्मे तिष्ठतां प्राप्तः शताब्दो द्वादशो रिपुः ।११
यवनैः पीडिताः सर्वे धर्म संस्कृति रक्षकाः
पलायित्वा हरिद्वारं प्राप्य तस्मादितस्ततः ।१२
प्राचीं प्रतीचीं चोदीचीमवाचीनां समन्ततः
आवासभूमीं सुगमां मार्गयन्तो गतश्रमाः ।१३
जुंला–भूमीं तपोयोग्यां विशालामूर्वरामपि
दृष्ट्वाचतेषां, सरिप, स्तत्रवासं न्यवासयत् ।१४
तत्पुत्र सरिणस्तस्माच्छृंखलः सगरस्ततः
हरदत्तो दशरथो राजाराम स्तथैव च ।१५
तुलसीदास जैदासौ महीदासः क्रमेण तु
महिदासाद्यमो लंवो निभः शंभुश्चजज्ञिरे ।१६
ते तत्र निर्ममुः शालां सुन्दरीं कनकाह्वयाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालादेवीं स्वहृत्संस्थां तपश्चक्रुः समादश ।१७
देवी प्रसन्ना वरदा प्रकटीभूय ताञ्जगौ
सत्यत्रेता द्वापरेषु कलिकालेऽपि सर्वदा ।१८
सत्य धर्मे सत्यकीर्तौ सत्येकर्मणि तिष्ठत !
युष्माकं मनसो भावो नगच्छेछ्छुटवर्त्मनि ।१९
एवमुक्ता महादेव्या कृत्वा तस्यै नमो नमः
निवेदयाञ्चक्रुरित्थं, देव्यस्माक मिमान्सुतान् ।२०
कामेशादींश्चतुभ्रातृन् रक्षेथास्त्वं समाहिता
यावद्वयं मुक्तिनाथं दृष्ट्वाऽऽगच्छाम आशुवै ।२१
वाढ मुक्ता गतास्ते तु मुक्तिं दामोदरं पुनः
हृषीकेशं मानसं च सरो गत्वा तिरोहिताः।२२
कालान्तरेषुतत्पुत्रा मार्गमाणाः पितुः पदम्
मानः सरोवरे प्राप्ताः शुश्रुवुः पितृ-निर्गमम् ।२३
तेषां दत्वा सुविमलं मानसरोवरोदकम्
कुशै स्तिलैश्च संसिक्तं पितृतृप्तिकरं शुभम् ।२४
परावृत्य पुनस्ते तु जुंला-राजासि जापतेः
पुत्र्योः स्वयंवरे यज्ञे नर्मदा,हर्मदाऽह्वयोः ।२५
आजग्मुस्तपसा दीप्ता रूपयौवन शालिनः
विद्यावन्तो विनीताश्च चत्वार श्चतुराःससाः ।२६
तथा राजगुरोः पुत्र्यौ शिवशर्मण एव च
यामुनी सुनती दिव्ये परिणाहोत्सुके स्थिते ।२७
गोशालः सुगुणो द्वौतु पितृंक्रमत आगतौ
ज्येष्ठ स्तृतीयः संवृत्तौ राजपुत्री-द्वयेन च । ।२८
कामेश श्चैव केदारो गुरुपुत्रीपतिं गतौ
एवं सदारा न्यवसन्सपरिच्छदसोविधाः । ।२९
सिंजापतिस्तु निष्पुत्रो दौहित्राय प्रकल्प्य च
स प्रासादं सर्वराज्यं स्वयन्तु दर्शके स्थितः ३०
पश्चात्पुनः सिंजपतेः पुत्ररत्नमजीजनत्
मन्त्रिभि र्मन्त्रणंकृत्वा दौहित्रायाऽर्धराज्यकम् ।३१
स्थिरीकृत्यकुमारायाऽधिजग्रहुः समार्धकम्
सिंजापतेः कुमारोऽसौ बलिराजः सुबोधितः ।३२
यौवने विनयापन्नः प्रजाः पालक-रक्षकः
एवं सुयोग्यं संदृष्ट्वा पित्रा राज्ये नियोजितः ।३३
यामुनी गुरुपुत्री च कामेशात्पुत्रमुत्तमम्
देवदत्तं जनयती तपो विद्यासमन्वितम् ।३४
सोऽपि स्वेसमये प्राप्ते पंच पुत्रानजीजनत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोविन्दमिन्द्रगजं च शिवशक्ति हरिं तथा १३५
लक्ष्मीप्रसादनामानं कनिष्ठ पितृसंमतम्
समये कृतसंस्काराः विद्यावन्तो गुणान्विताः १३६
ते सर्वे वलिराजस्य सभायां सात्विकेस्थितौ
लब्धप्रतिष्ठाः कुर्वन्ति न्याय्याऽन्याय्यविवेचनम् १३७
राजमान्या राजपूज्याः परस्पर हितैषिणः
परन्त्वेते स्वाभिमाना दूर्ध्वंमूर्धाभ्रमन्ति च १३८
इतिप्रचारः संजातः परिवेशे समन्ततः
विनीताः शिक्षिताश्चाऽपि शिरोनमनकातराः ३९
एकदा वलिराजश्च मनसस्तु विनोदनम्
एतान्नमयितुं दीप्तांश्चिन्तयन्कूटनीतिकम् १४०
षड्यन्त्रं रचयामास मंत्रिभिः संमतः सुधीः
गोप्यो गोप्यतरोमन्त्री नकश्चिद्वेद कारणम् १४१
श्वः प्रातर्राजद्वाराणि कदलीस्तम्भ तोरणैः
पुष्पमाल्यैर्धूपदीपैः सुगन्धीनि विधायं च १४२
मूलद्वारस्योर्द्ध्वभागे तीक्ष्णं शृङ्गार शोभितम्
करवालं तिरश्चीनं वहिर्धारप्रसारितम् १४३
स्पष्टं संरचयामासुश्चन्दनाऽगुरूमंडितम्
नात्युच्छ्रितं न वा नीचं नमित्वा गन्तुमर्हणम् १४४
अथते समये प्राप्ताः पंचबिप्राः सुमेधसः
नैतादृशं क्कचिद् दृष्टं स्वागतद्वार मुत्कटम् १४५
कारणं चिन्तयन्तरते ज्ञातवन्तः स्वनामनम्
जेष्ठो साहसिको गत्वा गलेन गलसंमितम् १४६
स्वेष्टदेवं नमस्कृत्य स्वाऽभिमानं सुरक्षितुम्
करवालं तिरस्कुर्वन्स्वयं छिन्नोवभूव ह १४७
एवं मध्योऽपरोऽन्यश्च भ्रातुर्गत्यनुसारिणः
स्वाऽभिमानं स्थापयन्तो वलेर्द्वारमरञ्जयन् ४८
तद्दृष्ट्वा च कनिष्ठोऽपि भ्रातृननुगमन्सुधीः
तथैव प्रक्रमेऽभीतो भीतोवलिरुवाच ह १४९
भो ! भो !! ब्रह्मणदायाद ! मतिर्नैपा भवत्सुमे
मनोविनोदं रचितं युष्मान्द्रष्टुं विनीतकान् १५०
परन्तु मम संजातः पराजयो भवज्जयः
भवन्तो दृढसंकल्पा ब्राह्मणा ब्रह्मवर्चसः १५१
एषोऽहं राज्यपुत्रेण मन्त्रिभिन स्वयमात्मना
भवतं शरणं यामि माऽस्तुमे ब्रम्हघातिता ५२
इति प्रसादितो विज्ञः सिजाराज्यमधिष्ठितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्यं संचालयामास धर्मतः पितृसंनिभः ।५३
समये धर्मपत्न्यांच क्षेत्रियायां विलोमतः
एकैक पुत्रौ संजातौ धनुः पुस्तक धारिणौ ।५४
ज्येष्ठो क्षत्रियदायादः कनिष्ठः श्रीधरस्तथा
राज्यभारं निरीक्षन्तौ पितुर्निर्देशकारिणौ ।५५
वहुकाले व्यतीतेतु पिता राजा द्विवङ्गतः
तस्योर्ध्वंहिकीं प्रेम्णा चक्रतु र्विधिपूर्विकाम् ५६
तयोस्तु समये राज्ये विवादः समुपस्थितः
मन्त्रिणाः क्षत्रियायैन ज्येष्ठाय राज्यमादिशन् ।५७
ततस्तु श्रीधरोऽमर्षी भ्रातूराज्ये प्रतिष्ठितुम्
अरोचयन्निर्जगाम त्रिभिः सार्धं पुरोदिशम् ।५८
एकोऽधिकारी विप्रश्च द्वौ शूद्रौ भारवाहकौ
शालग्रामं पुस्तकं च व्रह्मसूत्रं स्वयं दधन् ।५९
यावत्कुत्राऽपि न लभे प्रतिष्ठामात्मसाधिनीम्
पश्चिमाशां न पश्येयं प्रतिज्ञांमेऽव्रताच्छिवा ।६०
इत्युक्त्वा प्रस्थितोधीरो दश-पंचदिनै गतः
गुल्मीराज्यं रामसिंहो यत्रशास्ति प्रजाः वली।६१
सः प्रासादं रचयितुं प्रारब्धो वहु विस्तरम्
तदृष्ट्वा श्रीधरोयोगी क्षणार्धाद्दुर्घटिष्यति ! ।६२
इत्युक्त्वा चलितो मार्गं कर्मिणस्तच्च शुश्रुवुः
किं वदन्गतवान्विप्रः किंचात्र दुर्घटिष्यति ? ।६३
विप्रोगतो नाऽतिदूरे वटपिप्पल चत्वरे
विश्रान्तोहि महाभागःक्षणार्धं शान्तिमाप्तवान् ।६४
अथार्ध घटिका काले कपोतपालिकां गतः
प्रमुखः स्थपति स्तस्याः पपात च ममार च ।६५
ब्राह्मणोक्तां किंवदन्तीमादाय कर्मकारिणः
गत्वाराज्ञे दुर्घटनां वेदयन्तिस्म कातराः ६६
गद्गदाक्षरसांक्षिप्तैः पदैर्ज्ञात्वा महीपतिः
दूतं संप्रेषयामास विप्रमावर्तयन्द्रुतम् ६७
श्रीधरोऽपि स्वप्रतिज्ञां स्मारयित्वा न तं गतः
स्वयं राजाऽगतोधीमान्ब्रह्मतेजः स्मरन्नतः ।६८
तयोर्मधुरसंल्लापे ब्रह्मवृत्ति र्भविष्यति
प्रासादस्तुपूरणीयो वास्तु स्थपतिकालतः ।६९
इति द्वौ संप्रतिज्ञाय योगीवर्यं न्यवीवसत्
संपूर्त्यै राज भवनं वहिरट्टालि शोभितम् ।७०
वाटिकाभिस्तडागैश्चसोत्पलै र्देव मन्दिरैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दुरैः शस्त्रभवनै र्गोष्ठै रूद्यान चत्वरैः ।७१
परिरवाभि र्वहिर्द्वारै:कलशैस्तोरणैरपि
दुर्गैश्च सैन्य भवनैः संपूर्य राजमन्दिरम् ।७२
गृहप्रतिष्ठां संसाध्य राजविप्रं न्यवेदयत्
सुसन्तुष्टः सुसन्तुष्टचै ब्राह्मणस्य कृतादरः ।७३
मदीयो गुल्मी देशोऽयंदृष्ट्वा यत्रैव रोचसे
सूर्योदयादस्तकाले यावद्देशं क्रमिष्यसि ।७४
तावन्तं वीरताक्षेत्रं हृष्टः संकल्प्य दद्म्यहम्
भवत्प्रतिज्ञा पूर्णाऽस्तु साधनं जीवनस्य च ।७५
परन्तुमे कर्मकराः पश्चाद्धावन्ति घोटकैः
भवता पादचारेण ग्रहीतव्यं यथावलम् ।७६
इत्युक्तः श्रीधरो धीरः खिदीममुक्तमं स्मरन्
चतुर्योजनवर्गं गां दिनेनैकेन साधयत् ।७७
तत्रापि पोखराथोकमुद दारू समन्वितम्
शीतधर्मं समंज्ञात्वा संस्थलंवासमकृत ।७८
तत्रैव कुलदेवीति दुर्गां संस्थाप्य सात्विकीम्
वासन्तं शारदं चैव विजयां च विशेषतः ।७९
नित्यपूजां तयानैमित्तिकामपि स्वकालतः
तेनैव खिदीमाऽयेन चालयञ्छेश भोजनः ।८०
कुलदेवोमष्ट आसीच्छेतवाराहको हरिः
सर्वेषामेव जातीनां तत्प्रातिनिध्य रूपतः ।८१
सहाऽगतोऽधिकार्यैव कुलदेवी प्रपूजकः
कुलदेवोगौतमानां सर्वैरपि प्रतिष्ठितः ।८२
श्रावणान्मार्गसमये यदेच्छा सात्विकी भवेत्
तं संपूज्यच तस्मैव भोज्य सिद्धचेत्कुलार्चना ।८३
सहागतौ तस्यगति र्यादृशी तादृशीं सहो
द्वौभारवाहकौ भक्तौ वलवन्तौ मनस्विनौ ।८४
मोगरो विश्वकर्मा च निः शुल्कां प्राप्य जीविकाम्
उमरा मोगरो घुष्ट कटवालो वि. क स्तया ।८५
तथामैदान चौरालीं यूपश्च संप्रतिष्ठितौ
वासन्ते शारदे काले सभ भावेन पूजितौ ।८६
वेदपाठा चण्डिपाठा देवी भागवतस्य च
पारायणं रात्रिकाले माल्य श्री भजनं तया ।८७
दुर्गाया मन्दिरे विप्रान् वरित्वा वहु संख्यकान्
दैनिकं नवरात्रं च सप्तमीतो विशेषतः ।८८
पत्र प्रवेशः श्रीकाल–रात्र्या गौर्याश्च यूपके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूजापाठाय स्थानेषु घटस्थापन पूर्वकम् १८६
महोत्सवं शारदं च वासन्तमपि सूक्ष्मकम्
प्रवर्तयन्महाभागोनिम्ने सनातनेषु च १९०
दुर्वासा: पूर्वपुरुष: श्रीदुर्वासेश्वरं शिवम्
संस्थाप्य पूजयन्ध्यायन्यत्र सिद्धि समाप्तवान् १९१
तास्मिन्प्राकृतिके दुर्गे गोदुग्ध समवारिणा
प्रसिच्यते महेशान स्तल्लिगेऽपि च श्रीधर: १९२
तथा च दुर्गाऽरण्येऽपि श्रीमहादेव संस्थले
यत्रेदानीं मेघनाथो जीर्णोद्धारं व्यधत्तस: १९३
एवं पूर्वं शिलामात्रे दुग्ध ध्वज विभूषिते
अधुना भव्यतांयाते श्रीमालिका प्रतिस्थले १९४
मरूकूटे तथाऽलंवायने गुप्तोदक स्थले
श्री पाणिनि तपो भूमौ श्री सिद्धेश्वर स्तूपके १९५
विभिन्न पर्वप्राप्तेषु रुद्री चण्डी विधानत:
पंचस्थलेषुदेवेषु स श्रद्धो भक्तिमानभूत् १९६
जनता च प्रसन्नाऽसीद् हृष्टा-पुष्टा-स्वधार्मिका
अनुशासित मार्गस्था कर्मठा जागृता तथा १९७
एवं प्रान्तप्रदेऽशेपि, आदर्शं दर्शयन्प्रिय:
सर्वेषामादृतो भूत्वा न्याय्यमेव समाचरत् १९८
चत्वार स्तत्सुता आसन् खुलौलेया पनेरिया:
कोटालेया अतन्मध्ये विश्वनाथ: कुलङ्कर: १९९
तत्पुत्रो लोकनाथश्च शुकदेवस्तु तत्सुत:
शुकदेवाच्छिवंकार स्तस्मात्सुखकरोऽभवत् ११००
तत: सारङ्ग नामाऽसौ चत्वार स्तत्सुता: स्मृता:
धर्माङ्गदस्तु निर्वंश स्तिल्केनीयाश्च माज्वरा: ११०१
कुलङ्कर: सुन्दरश्च हरिदास स्ततोऽभवत्
ततो हेमन्तो विख्यातो राजद्वारेऽपि शाहके ११०२
तस्यद्वौ तनयावास्तां वालूपाध्याय ज्येष्ठत:
विसूपाध्याय सहितौ पितुर्निर्देश कारिणौ ११०३
काष्ठस्य मंडपे याते पितरि द्वौ निराकुलौ
खदीमं संरक्षयत: पितु: कालेऽपिवर्द्धकौ ११०४
हेमन्तस्तु कार्य भाराद्धनकुट्टां विसारित:
दैवाद्गृहे वर्तमाना धर्मपत्नी दिवंगता ११०५
नाऽतिवृद्धवयस्कोऽसौ निर्वाहाय स्वजीविकाम्
तत्रैव विप्रकन्यां च वैवाह विधिनाऽवहत् ११०६
तत्र पंच सुतोत्पत्ति र्जीविकोपार्जनं तथा
संस्कृत्यतान् सुकार्ये च विनियुज्य समन्तत: ११०७
पश्चात्स्वयंचाऽजगाम खिदीमं यत्र जन्मभू:
पुत्रपौत्रै:परिवृतो धर्मनिष्ठ स्ततोऽभवत् ११०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खिदीमे धनकुट्टायां हैमन्तेया: प्रसारिता:
धनकुट्टाऽष्टमोवंशः श्री भवानी प्रसाद सः ।१०९
सतुवंशकुलं मूलमन्विष्य संप्रयत्नतः
वंशाऽवलीमैतिह्यास्यां वटवृ क्षदलाङ्कितम् ।११०
प्रकाशयन् स्ववंशेस्मिन्धन्यो धन्यतर श्चसः
चिरं जीव्यात्स्वकार्याय श्री भवन्याः प्रसादतः ।१११
वालू विसूपाध्याययो वंशेषु जन विश्रुता:
नागेन्द्रनाथः कप्तानो हेरम्वो हेमलालकौ ।११२
लेफ्टेनौ ज्योतिषाऽचार्यौ वासुदेवः सुवेदरः
राधाकृष्णःकृष्णलालस्तारानाथ श्चबुद्धिमान् ।११३
खिमानन्दः शोभकान्तो नारायण प्रसाद च
पीताम्वरो धैर्यराज एते सुब्वा पदं श्रिताः ।११४
मित्रलालः पक्क वैद्यो यस्यौषधालय श्छदिः
भक्तिरामो वेणिमाधौ खरदारौ पुरातनौ ।११५
हुतराजो वैद्यराजो विचारी पद्मलोचनः
भेकलाल स्त्रोयनाथौ ज्यौतिषौ पितृपुत्रकौ ।११६
दुर्गाप्रसाज्क्षेरलालौ तान्त्रिकौ चोर बन्धने
गंगाप्रसाद् प्राड्विपाको ह्यभियुक्त विवेचकः ।११७
श्री अंबिका प्रसादश्च सुब्बा नारायणोऽपिच
चक्रपाणि स्त्रयोप्येते तापसा ऊ र्ध्वरेतसः ।११८
छविलालश्च गोर्खाली भीमार्जुन स्त्रयोप्यमी
वंशवृद्धाऽधुना वर्ष एकोनवति संचराः ।११९
दामोदरोऽपि वैरागी धौतरूद्राक्षधारकः
वल्कोट्गुठी भुखीयाऽक्षीललवणं वर्ज्य भोजनः ।१२०
श्री गोविन्द प्रसादोऽयं सरलोन्तः पटु मृदुः
सर्वकारीय-वित्तीया मुखिया प्रपदे स्थितः ।१२१
राजाकार्यं प्रजाकार्यं संमेल्य बुद्धिपूर्वकम्
वहुकालं पूर्वपरं-पराऽगत क्रमार्पितः ।१२२
वीरतोन्मूलने जाते पुनः स्थापयितुं दृढः
दशवर्षाणि धावित्वा माल न्यायायालयादिषु ।१२३
श्री दुर्गापूजनायाऽलं प्रमाणं पारितोष्यसौ
स्वकालेन दिवंयात स्तत्कार्यं स्थगितं गतम् ।१२४
तारानाथाद्धरिहरो नेपाले द्विजमंडले
बहु भूमीपति र्भूत्वा वांके वर्दिययोः स्थले ।१२५
कपिले वस्तु खिदिमे त्रिशूल्यां काष्ठमंडपे
दाङ्गेऽपिकृत्वा गणनां भूमीसुधार द्वारतः ।१२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहस्र षोडश मितां विगाहामर्ज्य मेदिनीम्
इलाकेदार नाम्ना वै सुविख्यातो व भूव ह ।१२७
बहुयज्वा दानशौंड श्छात्रेष्वधिक सौहृदः
मार्ग निर्मापक श्चैव ब्राह्मणानुपकारकः ।१२८
असौ श्री दधिरामाच्च गुरो संप्राप्य प्रेरणाम्
संस्कृतां पाठशालांच साऽवासां खिदिमे न्यधात् ।१२९
अत्रैव दह श्रीसिद्धे-श्वर शंकर संस्थले
पुरा वर्ष सहस्त्राणां त्रिके श्री पाणिनिर्मुनिः ।१३०
नटराजं सुसंतोष्य तपसा डमरू ध्वनेः
संकेत प्राप विद्याया बीजं वैदिक लौकिकम् ।१३१
तेनाऽक्षर समाम्नायं सृष्ट्वा सूत्र चतुर्दशम्
व्याकृतेर्जाल मुत्सृष्ट्वा विस्तारित मनुत्तमम् ।१३२
आसंसारान्मूर्न्धि संस्थं प्रामाणिकतयोच्यते
तस्यैव परिशेषेयं पाठशालाऽधुनाऽचलत् ।१३३
यस्यां पठन्त श्छात्रास्ते वेद व्याकरणे पृथक्
वाराणसेयीं संपूर्णां परीक्षां मध्यमाऽभिधाम् ।१३४
पारयित्वा स्वदेशस्य विभिन्ने कार्य क्षेत्रके
राष्ट्रसेवां प्रकुर्वन्तो दृश्यन्तेऽद्यापि प्रायशः ।१३५
दिवंयाते हरिहरे लग्ने भूमीसुधारके
निरूद्धासा पाठशाला शून्यं जनमनोऽभवत् ।१३६
तत्रैव वैदिकीं तीर्त्वा परीक्षां मध्यमाहूयाम्
काष्ठस्य मंडपाद्वाराणसीतः शास्त्रि पूरकः ।१३७
नारायणः स्वयंसेवी धनञ्जयसहायकः
उक्त विद्यालयं क्षुण्णं संयुज्य सर्वकारतः ।१३८
संचालक समित्या च नियुक्तः प्र. अ. संपदे
पुत्री हरिहर स्यैव विष्णु लक्ष्मीहरि द्वयो ।१३९
सपत्नमातरं योगकुमारीं माच्य दातृकान्
पाठशाला संपदर्थे भूमीं कपिल वस्तुगाम् ।१४०
विगाहाष्टौ षष्टिकं च समर्ज्य चिरकालिकाम्
विद्यालयोप भोगाय व्यवस्थामकरोत्दृढाम् ।१४१
नव शिक्षा योजनयाऽस्यां साधारण संयुतम्
श्री हरीहर सं. सा. मा. विद्यालय मुदाहृतम् ।१४२
प्रदातृभिः प्रदत्ताभूर्मालकार्यालययाऽस्थिरा
जाताऽसीत्सर्वकारस्य भूमि प्रशासनेन तु ।१४३
एकोत्तरं च पंचाशद् विद्यालयस्य नामनि
प्रमाणं भूमिपतिकं दत्वा, सप्तदशीं विघाम् ।१४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वकारोऽधिजग्राह वनसीमामिषेण च
तत्संपूर्त्यै सर्वकार: पुनरेव निवेदित: ।१४५
तथा प्यसौ देशमात्रे विद्यालय श्चतुर्थक:
आर्थिकैर्गण्यते, शिक्षा मन्त्रालय इतस्तत: । १४६
अत्रत्यं पाठपठनं स्तरीयं कर्तुमुद्यता:
शिक्षका; कुशला: स्निग्धा: सर्वत्रख्याति शालिन: । १४७
प्राय: प्रशिक्षिता धीरा अध्यात्म–भौतिक प्रिया:
श्रीपूर्वमध्यमामेवं एस्. एल्. सी. पाठयन्त्यमी । १४८
नारायण: पुनर्विद्यालय चालन पूर्वकम्
विद्यालयात्पूर्वभागे ह्युत्तरे स्वगृहात्पुन: ।१४९
दक्षिणोत्तरयो: खंडपट्के दुर्गम वर्त्मनि
जनतासहयोगेन शिलामास्तीर्य यत्नत: ।१५०
सुगमं मार्ग निर्माण करोतिस्म सदादृढम्
श्रीदुर्गा मन्दिरं जीर्णमुद्धार्य च जनै: सह । १५१
षोडशाच्च चतु श्चत्वारिंशते खिदिमाऽयके
माल–लग्ने जनै: शक्तया दुर्गा पूजा स्वचालिता ।१५२
गोविन्द कृत संरुद्धं पुन: संचाल्य राजके
पंच चत्वारिंशतश्च स्थायी–दुर्गाचनं व्यधात् । १५३
अस्मिन्वंशे सुप्रसिद्धा: पुरातन नवीनका:
पण्डिता जमदग्निश्च तुलसीप्रसाद कर्मठ: ।१५४
नारागण प्रसादोसौ श्रीरामजी प्रसाद च
येनोक्त पाठशालायां व्याकृताऽध्यापनं कृतम् । १५५
यस्य विद्यार्थिनो देशे पटव: कर्मठाश्चते
अन्ये, दामोदरो जीवनाथो दुर्गाप्रसाद च । १५६
स ज्योतिष–व्याकरणे, आचार्य: प्रथमोऽभवत्
तेन वाराणसी सं. वि. विद्यालयं पुरस्क्रिया ।१५७
नेपालराजतश्चैव सुवर्ण पदकौ जितौ
हुमनाथोऽपि साहित्याचार्य: स्वर्ण विभूषित: ।१५८
जनार्दनो मेघराजो मणिराज: कला धरौ
हरिप्रसाद: श्री नील कण्ठो नेत्रप्रसाद च ।१५९
प्रधानपंचा:–प्रथमो धैर्यराज: प्रवाचित:
इन्द्रामणि र्जीवनाथो मणिराज: खुमान्दन: ।१६०
सर्वेकदा जिववालो, मुखिया त्रिपदे स्थित:
धर्ता कर्ता तथाऽहर्ता घोषितो जनपज्जनै: ।१६१
वर्तमान: पं. प्रधानो नारायण प्रसाद स:
न्यायमूर्ति: कर्मठश्च जनतोद्धारक स्तथा । १६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding

परो गणेशो युवकः शान्तिं क्रान्तिं करोति च
क्षेत्रं दृष्टा समुचितं न्याय्यमार्गं न लंघयन् ।१६३
पूर्वकाले मध्यदेशे सर्वकाराऽभिसंमताः
पटवारिण इत्येते, तुल्सीप्रसाद पंडितः ।१६४
रङ्गनाथोऽपरस्तुल्सी प्रसादो विश्वनाथ सः
नारायण प्रसादश्च खर्दार भक्तिराम च । १६७
भरतमणि स्तथा वद्रीनाथः क्रमश एव च
मेघनाथो वुद्धिनाथ इमौद्वौ सहवासिनौ । १६८
स्वस्वक्षेत्रेपु निः स्नातौ निर्लोभौ निरहंकृतौ
दत्तं दुग्धांपिवन्तौ च न रक्त शोषकौ नृणाम् । १६९
कपिल्वस्तौ जनपदे सत्येनैव प्रतिष्ठितौ
कर्मचारी समूहेपु जनतासु समं स्थितौ । १७०
न्याय्यमेवो पसंस्थाप्य समस्या समधायकौ
लव्धप्रतिष्ठौ विश्वस्तौ पटवारी प्रमण्डले । १७१
मन्त्रिणौ द्वौ काशिनाथः काशीराजश्च घोषितौ
काशीनाथस्तु वाल्येऽपि निर्भीको गुरुणा सह । १७२
अज्ञातार्थे पदच्छेदे शास्त्रार्थेच विवादकः
सत्यं लव्ध्वा विरमते समाधानं न चान्यथा । १७३
वालकं तं कोऽपिकुर्यान्निन्दां श्लाघां प्रियेच्छया
इदमित्थं तस्य मर्म कर्तुं वृद्धान्प्र पृच्छति । १७४
स्वपूर्वाणां पूरुषाणां नीतिर्नायकवादिनी
तद्विरोधे कर्मकरै संगठन् मुक्तिमीहते । १७५
तत्स्वभावाज्जीवनेपु राजनीतौ जनात्मके
मानाऽपमानयोर्युध्यन्विजित्यैव दिवंगतः ।१७६
काशीराजो राजनीतौ चाणक्येव प्रहेलिकाः
चालयन्सफलोऽप्यत्र पुनरारोग्य आश्रमे । १७७
तेन प्राकृतिकी योग–शास्त्रीया पद्धति धृंता
विनौषधं प्राकृतिकै र्मृद्वायु जल रश्मिभिः ।१७८
पथ्येनापि व्याधितानां रोग नाशयति दृढम्
कार्याऽकार्य विवेकेन सर्वत्र युक्ति योजकः ।१७९
सूनृतां वाचमालम्व्य रोगिणोऽन्यायपीडितां
श्चोपकुर्वन्सुहृद्वारैः साधनै र्जनताप्रियः ।१८०
तस्य भ्राता ज्ञानुइति ख्यातः श्री कृष्णराज सः
नेपाल न्याय वक्तृत्वे प्रथमः समघोषितः ।१८१
ज्ञाता पोडश–भापाणां वहुदेशेपु पर्यटन्
नेपाल विश्व भाषायाः पाठशालाप्रपाठकः ।१८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

औद्योगिकेऽपि कार्येऽसौ सिद्धहस्तो विचार वान्
समुन्नति पथाऽऽरूढो दौर्भाग्येन दिवंगतः ।१८३
चिन्तामणि स्तूर्धमार्गे जल धारीं व्यधत्तसः
गोर्खालीयो भूतफले जनाऽऽवास च निर्ममो । १८४
ॐ प्रसादो ज़नपद–विकाशाधिकृतो ह्य भूत्
जगजीवन श्रीपंचमाल कार्यालयाऽधिकृत् । १८५
एंप्रसादः कृषिफलेऽधिकृतश्च प्रशिक्षकः
कृष्यापणस्य सेवायां तुलस्यधिकृतः स च । १८६
फिलिपिन्स प्रशिक्षायां विशेषज्ञः कृपो मतः
जीवराजोऽपितत्प्राप्तुं फिलिपिन्सं गतोऽधुना । १८७
पीताम्वरः पिलिपिन्सात्कृपि विज्ञः समेत्य च
पुनर्वारं तत्रगत्वाऽनुसंधान प्रवीणताम् । १८८
संसाधयन्कृपिक्षेत्रे सर्वज्ञो भवितुं दृढः
खरदारः खिमानन्दो वडाहाकिं क्वचिद्गतः । १८९
केचित्प्राध्यापकाऽन्येच सेवसना न्यायपालकाः
सुब्बाखर्दार मुखियाः शक्यन्ते गणितुं नहि । १९०
एवं श्री सर्वकारस्य संस्था कार्यालयेपु च
घरेलूद्योगशालायां मीनप्रसाद गौतमः । १९१
सीमेण्टोद्योग क्षेत्रेचेश्वरचन्द्रः प्रवर्तते
दूरसंचारके कार्ये सुरेन्द्रः कुशलोऽस्तिसः
मोतिराजश्च मदनो गणेश इंजिनीयराः
डाक्टरोमाधवो विश्वेश्वरप्रसाद एव च । १९३
वैद्यराजो मोहन श्च विद्या वारिधिमाधवः
असौतु श्री म. सं. वि. वि. कुल साचिव्यतां गतः । १९४
किशोरो रामराजश्च यन्त्रं संचाल्य संस्थितौ
राजनीतौ सुविख्यातो हेमन्त गौतमोस्ति च । १९५
खिमानन्दो वाबुरामो हुलाकी मुखिया स्थितौ
अन्येपामभिलेखं च ज्ञात्वावर्द्धिष्यते क्रमः । १९६
उपेन्द्रो लेखा अधिकृतः खुमानन्द श्च वैंकगण्
ति लक्रामो ग्रामनेता वामदेवो वहुप्रजः ।१९७

गौतमैः पूजिताश्चान्य गोत्रजाः खिदिम स्थिताः
हितेच्छवश्चसर्वेपां गुरवः सपुरोहिताः १ {१९८
काश्यपाऽत्रेय वासिष्ठा मांडव्या श्च धनंजयाः
पंडिता राजनीतिज्ञा वैद्यकाः कर्म वेदिनः २ {१९९
सर्वे भिलित्वा नीरागा निर्द्वेपाः खिदिमन्तिमम्
समुन्नयन्तोदृश्यन्ते कुलधर्माऽवलम्बिनः ३ {२००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Foundation

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu